# श्रीमहागणपति-सहस्रनामस्तोत्रम्

॥ श्रीगणेशाय नमः ॥

अथ ध्यानम्

पञ्चवक्त्रो दशभुजो भालचन्द्रः शशिप्रभः ।
मुण्डमालः सर्पभूषो मुकुटाङ्गदभूषणः ।
अग्न्यर्कशशिनो भाभिस्तिरस्कुर्वन्दशायुधः ॥

अथ स्तोत्रम्

ॐ गणेश्वरो गणक्रीडो गणनाथो गणाधिपः ।
एकदंष्ट्रो वक्रतुण्डो गजवक्त्रो महोदरः ॥ १ ॥

लम्बोदरो धूम्रवर्णो विकटो विघ्ननायकः ।
सुमुखो दुर्मुखो बुद्धो विघ्नराजो गजाननः ॥ २ ॥

भीमः प्रमोद आमोदः सुरानन्दो मदोत्कटः ।
हेरम्बः शम्बरः शम्भुर्लम्बकर्णो महाबलः ॥ ३ ॥

नन्दनोऽलम्पटोऽभीरुर्मेघनादो गणञ्जयः ।
विनायको विरूपाक्षो धीरशूरो वरप्रदः ॥ ४ ॥

महागणपतिर्बुद्धिप्रियः क्षिप्रप्रसादनः ।
रुद्रप्रियो गणाध्यक्ष उमापुत्रोऽघनाशनः ॥ ५ ॥

कुमारगुरुरीशानपुत्रो मूषकवाहनः ।
सिद्धिप्रियः सिद्धिपतिः सिद्धः सिद्धिविनायकः ॥ ६ ॥





अविघ्नस्तुम्बुरुः सिंहवाहनो मोहिनीप्रियः ।
कटङ्कटो राजपुत्रः शालकः सम्मितोऽमितः ॥ ७ ॥

कूष्माण्डसामसम्भूतिर्दुर्जयो धूर्जयो जयः ।
भूपतिर्भुवनपतिर्भूतानां पतिरव्ययः ॥ ८ ॥

विश्वकर्ता विश्वमुखो विश्वरूपो निधिर्घृणिः ।
कविः कवीनामृषभो ब्रह्मण्यो ब्रह्मणस्पतिः ॥ ९ ॥

ज्येष्ठराजो निधिपतिर्निधिप्रियः पतिप्रियः ।
हिरण्मयपुरान्तस्थः सूर्यमण्डलमध्यगः ॥ १० ॥

कराहतिध्वस्तसिन्धुसलिलः पूषदन्तभित् ।
उमाङ्ककेलिकुतुकी मुक्तिदः कुलपालनः ॥ ११ ॥

किरीटी कुण्डली हारी वनमाली मनोमयः ।
वैमुख्यहतदैत्यश्रीः पादाहतिजितक्षितिः ॥ १२ ॥

सद्योजातस्वर्णमुञ्जमेखली दुर्निमित्तहृत् ।
दुःस्वप्नहृत्प्रसहनो गुणी नादप्रतिष्ठितः ॥ १३ ॥

सुरूपः सर्वनेत्राधिवासो वीरासनाश्रयः ।
पीताम्बरः खण्डरदः खण्डेन्दुकृतशेखरः ॥ १४ ॥

चित्राङ्कश्यामदशनो भालचन्द्रश्चतुर्भुजः ।
योगाधिपस्तारकस्थः पुरुषो गजकर्णकः ॥ १५ ॥

गणाधिराजो विजयस्थिरो गजपतिध्वजी ।
देवदेवः स्मरप्राणदीपको वायुकीलकः ॥ १६ ॥

विपश्चिद्वरदो नादोन्नादभिन्नबलाहकः ।
वराहरदनो मृत्युञ्जयो व्याघ्राजिनाम्बरः ॥ १७ ॥

इच्छाशक्तिधरो देवत्राता दैत्यविमर्दनः ।
शम्भुवक्त्रोद्भवः शम्भुकोपहा शम्भुहास्यभूः ॥१८ ॥

शम्भुतेजाः शिवाशोकहारी गौरीसुखावहः ।
उमाङ्गमलजो गौरीतेजोभूः स्वर्धुनीभवः ॥ १९ ॥

यज्ञकायो महानादो गिरिवर्ष्मा शुभाननः ।
सर्वात्मा सर्वदेवात्मा ब्रह्ममूर्धा ककुप्श्रुतिः ॥ २० ॥

ब्रह्माण्डकुम्भश्चिद्व्योमभालः सत्यशिरोरुहः ।
जगज्जन्मलयोन्मेषनिमेषोऽग्न्यर्कसोमदृक् ॥ २१ ॥

गिरीन्द्रैकरदो धर्माधर्मोष्ठः सामबृंहितः ।
ग्रहर्क्षदशनो वाणीजिह्वो वासवनासिकः ॥ २२ ॥

कुलाचलांसः सोमार्कघण्टो रुद्रशिरोधरः ।
नदीनदभुजः सर्पाङ्गुलीकः तारकानखः ॥ २३ ॥

भ्रूमध्यसंस्थितकरो ब्रह्मविद्यामदोत्कटः ।
व्योमनाभिः श्रीहृदयो मेरुपृष्ठोऽर्णवोदरः ॥ २४ ॥

कुक्षिस्थयक्षगन्धर्वरक्षःकिन्नरमानुषः ।
पृथ्वीकटिः सृष्टिलिङ्गः शैलोरुर्दस्रजानुकः ॥ २५ ॥

पातालजङ्घो मुनिपात्कालाङ्गुष्ठस्त्रयीतनुः ।
ज्योतिर्मण्डललाङ्गूलो हृदयालाननिश्चलः ॥ २६ ॥

हृत्पद्मकर्णिकाशालिवियत्केलिसरोवरः ।
सद्भक्तध्याननिगडः पूजावारीनिवारितः ॥ २७ ॥

प्रतापी कश्यपसुतो गणपो विष्टपी बली ।
यशस्वी धार्मिकः स्वोजाः प्रथमः प्रथमेश्वरः ॥ २८ ॥

चिन्तामणिद्वीपपतिः कल्पद्रुमवनालयः ।
रत्नमण्डपमध्यस्थो रत्नसिंहासनाश्रयः ॥ २९ ॥
तीव्राशिरोधृतपदो ज्वालिनीमौलिलालितः ।
नन्दानन्दितपीठश्रीर्भोगदाभूषितासनः ॥ ३० ॥





सकामदायिनीपीठः स्फुरदुग्रासनाश्रयः ।
तेजोवतीशिरोरत्नं सत्यानित्यावतंसितः ॥ ३१ ॥
सविघ्ननाशिनीपीठः सर्वशक्त्यम्बुजाश्रयः ।
लिपिपद्मासनाधारो वह्निधामत्रयाश्रयः ॥ ३२ ॥

उन्नतप्रपदो गूढगुल्फः संवृतपार्ष्णिकः ।
पीनजङ्घः श्लिष्टजानुः स्थूलोरुः प्रोन्नमत्कटिः ॥ ३३ ॥

निम्ननाभिः स्थूलकुक्षिः पीनवक्षा बृहद्भुजः ।
पीनस्कन्धः कम्बुकण्ठो लम्बोष्ठो लम्बनासिकः ॥ ३४ ॥

भग्नवामरदस्तुङ्गसव्यदन्तो महाहनुः ।
ह्रस्वनेत्रत्रयः शूर्पकर्णो निबिडमस्तकः ॥ ३५ ॥

स्तबकाकारकुम्भाग्रो रत्नमौलिर्निरङ्कुशः ।
सर्पहारकटीसूत्रः सर्पयज्ञोपवीतवान् ॥ ३६ ॥

सर्पकोटीरकटकः सर्पग्रैवेयकाङ्गदः ।
सर्पकक्ष्योदराबन्धः सर्पराजोत्तरीयकः ॥ ३७ ॥

रक्तो रक्ताम्बरधरो रक्तमाल्यविभूषणः ।
रक्तेक्षणो रक्तकरो रक्तताल्वोष्ठपल्लवः ॥ ३८ ॥

श्वेतः श्वेताम्बरधरः श्वेतमाल्यविभूषणः ।
श्वेतातपत्ररुचिरः श्वेतचामरवीजितः ॥ ३९ ॥

सर्वावयवसम्पूर्णः सर्वलक्षणलक्षितः ।
सर्वाभरणशोभाढ्यः सर्वशोभासमन्वितः ॥ ४० ॥

सर्वमङ्गलमाङ्गल्यः सर्वकारणकारणम् ।
सर्वदैककरः शार्ङ्गी बीजापूरी गदाधरः ॥ ४१ ॥

इक्षुचापधरः शूली चक्रपाणिः सरोजभृत् ।
पाशी धृतोत्पलः शालीमञ्जरीभृत्स्वदन्तभृत् ॥ ४२ ॥

कल्पवल्लीधरो विश्वाभयदैककरो वशी ।
अक्षमालाधरो ज्ञानमुद्रावान्मुद्गरायुधः ॥ ४३ ॥

पूर्णपात्री कम्बुधरो विधृतालिसमुद्गकः ।
मातुलिङ्गधरश्चूतकलिकाभृत्कुठारवान् ॥ ४४ ॥

पुष्करस्थस्वर्णघटी पूर्णरत्नाभिवर्षकः ।
भारती सुन्दरीनाथो विनायकरतिप्रियः ॥ ४५ ॥

महालक्ष्मीप्रियतमः सिद्धलक्ष्मीमनोरमः ।
रमारमेशपूर्वाङ्गो दक्षिणोमामहेश्वरः ॥ ४६ ॥

महीवराहवामाङ्गो रतिकन्दर्पपश्चिमः ।
आमोदमोदजननः सप्रमोदप्रमोदनः ॥ ४७ ॥

समेधितसमृद्धिश्रीर्ऋद्धिसिद्धिप्रवर्तकः ।
दत्तसौमुख्यसुमुखः कान्तिकन्दलिताश्रयः ॥ ४८ ॥

मदनावत्याश्रिताङ्घ्रिः कृत्तदौर्मुख्यदुर्मुखः ।
विघ्नसम्पल्लवोपघ्नः सेवोन्निद्रमदद्रवः ॥ ४९ ॥

विघ्नकृन्निघ्नचरणो द्राविणीशक्तिसत्कृतः ।
तीव्राप्रसन्ननयनो ज्वालिनीपालितैकदृक् ॥ ५० ॥

मोहिनीमोहनो भोगदायिनीकान्तिमण्डितः ।
कामिनीकान्तवक्त्रश्रीरधिष्ठितवसुन्धरः ॥ ५१ ॥

वसुन्धरामदोन्नद्धमहाशङ्खनिधिप्रभुः ।
नमद्वसुमतीमौलिमहापद्मनिधिप्रभुः ॥ ५२ ॥

सर्वसद्गुरुसंसेव्यः शोचिष्केशहृदाश्रयः ।
ईशानमूर्धा देवेन्द्रशिखा पवननन्दनः ॥ ५३ ॥

अग्रप्रत्यग्रनयनो दिव्यास्त्राणां प्रयोगवित् ।
ऐरावतादिसर्वाशावारणावरणप्रियः ॥ ५४ ॥





वज्राद्यस्त्रापरीवारो गणचण्डसमाश्रयः ।
जयाजयपरीवारो विजयाविजयावहः ॥५५॥

अजितार्चितपादाब्जो नित्यानित्यावतंसितः ।
विलासिनीकृतोल्लासः शौण्डीसौन्दर्यमण्डितः ॥५६॥

अनन्तानन्तसुखदः सुमङ्गलसुमङ्गलः ।
इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिनिषेवितः ॥५७॥

सुभगासंश्रितपदो ललिताश्रयः ।
कामिनीकामनः काममालिनीकेलिलालितः ॥५८॥

सरस्वत्याश्रयो गौरीनन्दनः श्रीनिकेतनः ।
गुरुगुप्तपदो वाचासिद्धो वागीश्वरीपतिः ॥५९॥

नलिनीकामुको वामारामो ज्येष्ठामनोरमः ।
रौद्रिमुद्रितपादाब्जो हुम्बीजस्तुङ्गशक्तिकः ॥६०॥

विश्वादिजननत्राणः स्वाहाशक्तिः सकीलकः ।
अमृताब्धिकृतावासो मदघूर्णितलोचनः ॥६१॥

उच्छिष्टगण उच्छिष्टगणेशो गणनायकः ।
सार्वकालिकसंसिद्धिर्नित्यशैवो दिगम्बरः ॥६२॥

अनपायोऽनन्तदृष्टिरप्रमेयोऽजरामरः ।
अनाविलोऽप्रतिरथो ह्यच्युतोऽमृतमक्षरम् ॥६३॥

अप्रतर्क्योऽक्षयोऽजय्यो नाधारोऽनामयोऽमलः ।
अमोघसिद्धिरद्वैतमघोरोऽप्रमिताननः ॥६४॥

अनाकारोऽब्धिभूम्यग्निबलघ्नोऽव्यक्तलक्षणः ।
आधारपीठ आधार आधाराधेयवर्जितः ॥६५॥

आखुकेतन आशापूरक आखुमहारथः ।
इक्षुसागरमध्यस्थ इक्षुभक्षणलालसः ॥६६॥

इक्षुचापातिरेकश्रीरिक्षुचापनिषेवितः ।
इन्द्रगोपसमानश्रीरिन्द्रनीलसमद्युतिः ॥६७॥

इन्दीवरदलश्याम इन्दुमण्डलनिर्मलः ।
इध्मप्रिय इडाभाग इराधामेन्दिराप्रियः ॥६८॥

इक्ष्वाकुविघ्नविध्वंसी इतिकर्तव्यतेप्सितः ।
ईशानमौलिरीशान ईशानसुत ईतिहा ॥६९॥

ईषणात्रयकल्पान्त ईहामात्रविवर्जितः ।
उपेन्द्रउडुभृन्मौलिरुण्डेरकबलिप्रियः ॥७०॥

उन्नतानन उत्तुङ्ग उदारस्त्रिदशाग्रणीः ।
ऊर्जस्वानूष्मलमद ऊहापोहदुरासदः ॥७१॥

ऋग्यजुःसामसम्भूतिर्ऋद्धिसिद्धिप्रदायकः ।
ऋजुचित्तैकसुलभः ऋणत्रयविमोचकः ॥७२॥

लुप्त विघ्नः स्वभक्तानां लुप्तशक्तिः सुरद्विषाम् ।
लुप्तश्रीर्विमुखार्चानां लूताविस्फोटनाशनः ॥७३॥

एकारपीठमध्यस्थ एकपादकृतासनः ।
एजिताखिलदैत्यश्रीरेधिताखिलसंश्रयः ॥७४॥

ऐश्वर्यनिधिरैश्वर्यमैहिकामुष्मिकप्रदः ।
ऐरम्मदसमोन्मेष ऐरावतनिभाननः ॥७५॥

ओङ्कारवाच्य ओङ्कार ओजस्वानोषधीपतिः ।
औदार्यनिधिरौद्धत्यधुर्यं औन्नत्यनिस्वनः ॥७६॥

अङ्कुशः सुरनागानामङ्कुशः सुरविद्विषाम् ।
अःसमस्तविसर्गान्तपदेषु परिकीर्तितः ॥७७॥

कमण्डलुधरः कल्पः कपर्दी कलभाननः ।
कर्मसाक्षी कर्मकर्ता कर्माकर्मफलप्रदः ॥७८॥





कदम्बगोलकाकारः कूष्माण्डगणनायकः ।
कारुण्यदेहः कपिलः कथकः कटिसूत्रभृत् ॥७९॥

खर्वः खड्गप्रियः खड्गखान्तान्तस्थः खनिर्मलः ।
खल्वाटनश्रृङ्गनिलयः खट्वाङ्गी खदुरासदः ॥८०॥

गुणाढ्यो गहनो गस्थो गद्यपद्यसुधार्णवः ।
गद्यगानप्रियो गर्जो गीतगीर्वाणपूर्वजः ॥८१॥

गुह्याचाररतो गुह्यो गुह्यागमनिरूपितः ।
गुहाशयो गुहाब्धिस्थो गुरुगम्यो गुरोर्गुरुः ॥८२॥

घण्टाघर्घरिकामाली घटकुम्भो घटोदरः ।
चण्डश्चण्डेश्वरसुहृच्चण्डीशश्चण्डविक्रमः ॥८३॥

चराचरपतिश्चिन्तामणिचर्वणलालसः ।
छन्दश्छन्दोवपुश्छन्दो दुर्लक्ष्यश्छन्दविग्रहः ॥८४॥

जगद्योनिर्जगत्साक्षी जगदीशो जगन्मयः ।
जपो जपपरो जप्यो जिह्वासिंहासनप्रभुः ॥८५॥

झलझ्झलोल्लसद्दानझङ्कारिभ्रमराकुलः ।
टङ्कारस्फारसंरावष्टङ्कारिमणिनूपुरः ॥८६॥

ठद्वयीपल्लवान्तस्थसर्वमन्त्रैकसिद्धिदः ।
डिण्डिमुण्डो डाकिनीशो डामरो डिण्डिमप्रियः ॥८७॥

ढक्कानिनादमुदितो ढौको ढुण्ढिविनायकः ।
तत्त्वानां परमं तत्त्वं तत्त्वंपदनिरूपितः ॥८८॥

तारकान्तरसंस्थानस्तारकस्तारकान्तकः ।
स्थाणुः स्थाणुप्रियः स्थाता स्थावरं जङ्गमं जगत् ॥८९॥

दक्षयज्ञप्रमथनो दाता दानवमोहनः ।
दयावान्दिव्यविभवो दण्डभृद्दण्डनायकः ॥९०॥

दन्तप्रभिन्नाभ्रमालो दैत्यवारणदारणः ।
दंष्ट्रालग्नद्विपघटो देवार्थनृगजाकृतिः ॥९१॥

धनधान्यपतिर्धन्यो धनदो धरणीधरः ।
ध्यानैकप्रकटो ध्येयो ध्यानं ध्यानपरायणः ॥९२॥

नन्द्यो नन्दिप्रियो नादो नादमध्यप्रतिष्ठितः ।
निष्कलो निर्मलो नित्यो नित्यानित्यो निरामयः ॥९३॥

परं व्योम परं धाम परमात्मा परं पदम् ।
परात्परः पशुपतिः पशुपाशविमोचकः ॥९४॥

पूर्णानन्दः परानन्दः पुराणपुरुषोत्तमः ।
पद्मप्रसन्ननयनः प्रणताज्ञानमोचनः ॥९५॥

प्रमाणप्रत्ययातीतः प्रणतार्तिनिवारणः ।
फलहस्तः फणिपतिः फेत्कारः फाणितप्रियः ॥९६॥

बाणार्चिताङ्घ्रियुगलो बालकेलिकुतूहली ।
ब्रह्म ब्रह्मार्चितपदो ब्रह्मचारी बृहस्पतिः ॥९७॥

बृहत्तमो ब्रह्मपरो ब्रह्मण्यो ब्रह्मवित्प्रियः ।
बृहन्नादाग्र्यचीत्कारो ब्रह्माण्डावलिमेखलः ॥९८॥

भ्रूक्षेपदत्तलक्ष्मीको भर्गो भद्रो भयापहः ।
भगवान् भक्तिसुलभो भूतिदो भूतिभूषणः ॥९९॥

भव्यो भूतालयो भोगदाता भ्रूमध्यगोचरः ।
मन्त्रो मन्त्रपतिर्मन्त्री मदमत्तमनोरमः ॥१००॥

मेखलावान्मन्दगतिर्मतिमत्कमलेक्षणः ।
महाबलो महावीर्यो महाप्राणो महामनाः ॥१०१॥

यज्ञो यज्ञपतिर्यज्ञगोप्ता यज्ञफलप्रदः ।
यशस्करो योगगम्यो याज्ञिको याजकप्रियः ॥१०२॥





रसो रसप्रियो रस्यो रञ्जको रावणार्चितः ।
रक्षो रक्षाकरो रत्नगर्भो राज्यसुखप्रदः ॥१०३॥

लक्ष्यं लक्ष्यप्रदो लक्ष्यो लयस्थो लड्डुकप्रियः ।
लानप्रियो लास्यपरो लाभकृल्लोकविश्रुतः ॥१०४॥

वरेण्यो वह्निवदनो वन्द्यो वेदान्तगोचरः ।
विकर्ता विश्वतश्चक्षुर्विधाता विश्वतोमुखः ॥१०५॥

वामदेवो विश्वनेता वज्रिवज्रनिवारणः ।
विश्वबन्धनविष्कम्भाधारो विश्वेश्वरप्रभुः ॥१०६॥

शब्दब्रह्म शमप्राप्यः शम्भुशक्तिगणेश्वरः ।
शास्ता शिखाग्रनिलयःशरण्यः शिखरीश्वरः ॥१०७॥

षड्ऋतुकुसमस्रग्वी षडाधारः षडक्षरः ।
संसारवैद्यः सर्वज्ञः सर्वभेषजभेषजम् ॥१०८॥

सृष्टिस्थितिलयक्रीडा सुरकुञ्जरभेदनः ।
सिन्दूरितमहाकुम्भः सदसद्व्यक्तिदायकः ॥१०९॥

साक्षी समुद्रमथनः स्वसंवेद्यः स्वदक्षिणः ।
स्वतन्त्रः सत्यसङ्कल्पः सामगानरतः सुखी ॥११०॥

हंसो हस्तिपिशाचीशो हवनं हव्यकव्यभुक् ।
हव्यो हुतप्रियो हर्षो हृल्लेखामन्त्रमध्यगः ॥१११॥

क्षेत्राधिपः क्षमाभर्ता क्षमापरपरायणः ।
क्षिप्रक्षेमकरः क्षेमानन्दः क्षोणीसुरद्रुमः ॥११२॥

धर्मप्रदोऽर्थदः कामदाता सौभाग्यवर्धनः ।
विद्याप्रदो विभवदो मुक्तिभुक्तिफलप्रदः ॥११३॥

आभिरूप्यकरो वीरश्रीप्रदो विजयप्रदः ।
सर्ववश्यकरो गर्भदोषहा पुत्रपौत्रदः ॥११४॥

मेधादः कीर्तिदः शोकहारी दौर्भाग्यनाशनः ।
प्रतिवादिमुखस्तम्भो रुष्टचित्तप्रसादनः ॥११५॥

पराभिचारशमनो दुःखभञ्जनकारकः ।
लवस्त्रुटिः कला काष्ठा निमेषस्तत्परः क्षणः ॥११६॥

घटी मुहूर्तः प्रहरो दिवा नक्तमहर्निशम् ।
पक्षो मासोऽयनं वर्षं युगं कल्पो महालयः ॥११७॥

राशिस्तारा तिथिर्योगो वारः करणमंशकम् ।
लग्नं होरा कालचक्रं मेरुः सप्तर्षयो ध्रुवः ॥११८॥

राहुर्मन्दः कविर्जीवो बुधो भौमः शशी रविः ।
कालः सृष्टिः स्थितिर्विश्वं स्थावरं जङ्गमं च यत् ॥११९॥

भूरापोऽग्निर्मरुद्व्योमाहंकृतिः प्रकृतिः पुमान् ।
ब्रह्मा विष्णुः शिवो रुद्र ईशः शक्तिः सदाशिवः ॥१२०॥

त्रिदशाः पितरः सिद्धा यक्षा रक्षांसि किन्नराः ।
साद्ध्या विद्याधरा भूता मनुष्यः पशवः खगाः ॥१२१॥

समुद्रा सरितः शैला भूतं भव्यं भवोद्भवः ।
साङ्ख्यं पातञ्जलं योगः पुराणानि श्रुतिः स्मृतिः ॥१२२॥

वेदाङ्गानि सदाचारो मीमांसा न्यायविस्तरः ।
आयुर्वेदो धनुर्वेदो गान्धर्वं काव्यनाटकम् ॥१२३॥

वैखानसं भागवतं सात्वतं पाञ्चरात्रकम् ।
शैवं पाशुपतं कालामुखं भैरवशासनम् ॥१२४॥

शाक्तं वैनायकं सौरं जैनमार्हतसंहिता ।
सदसद्व्यक्तमव्यक्तं सचेतनमचेतनम् ॥१२५॥

बन्धो मोक्षः सुखं भोगोऽयोगः सत्यमणुर्महान् ।
स्वस्ति हुंफट् स्वधा स्वाहा श्रौषड्वौषड्वषण्णमः ॥१२५॥





ज्ञानं विज्ञानमानन्दो बोधः संविच्छमो यमः ।
एक एकाक्षराधार एकाक्षरपरायणः ॥ १२७ ॥

एकाग्रधीरेकवीर एकाऽनेकस्वरूपधृक् ।
द्विरूपो द्विभुजो द्व्यक्षो द्विरदो द्विपरक्षकः ॥ १२८ ॥

द्वैमातुरो द्विवदनो द्वन्द्वातीतो द्वयातिगः ।
त्रिधामा त्रिकरस्त्रेता त्रिवर्गफलदायकः ॥ १२९ ॥

त्रिगुणात्मा त्रिलोकादिस्त्रिशक्तीशस्त्रिलोचनः ।
चतुर्बाहुश्चतुर्दन्तश्चतुरात्मा चतुर्मुखः ॥ १३० ॥

चतुर्विधोपायमयश्चतुर्वर्णाश्रमाश्रयः ।
चतुर्विधवचोवृत्तिपरिवृत्तिप्रवर्तकः ॥ १३१ ॥

चतुर्थीपूजनप्रीतश्चतुर्थीतिथिसम्भवः ।
पन्चाक्षरात्मा पञ्चात्मा पञ्चास्यः पञ्चकृत्यकृत् ॥ १३२ ॥

पञ्चाधारः पन्चवर्णः पन्चाक्षरपरायणः ।
पन्चतालः पन्चकरः पन्चप्रणवभावितः ॥ १३३ ॥

पन्चब्रह्ममयस्फूर्तिः पन्चावरणवारितः ।
पन्चभक्ष्यप्रियः पन्चबाणः पञ्चशिवात्मकः ॥ १३४ ॥

षट्कोणपीठः षट्चक्रधामा षड्ग्रन्थिभेदकः ।
षडध्वध्वान्तविध्वंसी षडङ्गुलमहाह्रदः ॥ १३५ ॥

षण्मुखः षण्मुखभ्राता षट्शक्तिपरिवारितः ।
षड्वैरिवर्गविध्वंसी षडूर्मिभयभञ्जनः ॥ १३६ ॥

षडर्कदूरः षट्कर्मनिरतः षड्रसाश्रयः ।
सप्तपातालचरणः सप्तद्वीपोरुमण्डलः ॥ १३७ ॥

सप्तस्वर्लोकमुकुटः सप्तसप्तिवरप्रदः ।
सप्ताङ्गराज्यसुखदः सप्तर्षिगणमण्डितः ॥ १३८ ॥

सप्तच्छन्दोनिधिः सप्तहोता सप्तस्वराश्रयः ।
सप्ताब्धिकेलिकासारः सप्तमातृनिषेवितः ॥ १३९ ॥

सप्तच्छन्दोमोदमदः सप्तच्छन्दोमखप्रभुः ।
अष्टमूर्तिर्ध्येयमूर्तिरष्टप्रकृतिकारणम् ॥ १४० ॥

अष्टाङ्गयोगफलभूरष्टपत्राम्बुजासनः ।
अष्टशक्तिसमृद्धश्रीरष्टैश्वर्यप्रदायकः ॥ १४१ ॥

अष्टपीठोपपीठश्रीरष्टमातृसमावृतः ।
अष्टभैरवसेव्योऽष्टवसुवन्द्योऽष्टमूर्तिभृत् ॥ १४२ ॥

अष्टचक्रस्फुरन्मूर्तिरष्टद्रव्यहविःप्रियः ।
नवनागासनाध्यासी नवनिध्यनुशासिता ॥ १४३ ॥

नवद्वारपुराधारो नवाधारनिकेतनः ।
नवनारायणस्तुत्यो नवदुर्गानिषेवितः ॥ १४४ ॥

नवनाथमहानाथो नवनागविभूषणः ।
नवरत्नविचित्राङ्गो नवशक्तिशिरोद्धृतः ॥ १४५ ॥

दशात्मको दशभुजो दशदिक्पतिवन्दितः ।
दशाध्यायो दशप्राणो दशेन्द्रियनियामकः ॥ १४६ ॥

दशाक्षरमहामन्त्रो दशाशाव्यापिविग्रहः ।
एकादशादिभि रुद्रैः स्तुत एकादशाक्षरः ॥ १४७ ॥

द्वादशोद्दण्डदोर्दण्डो द्वादशान्तनिकेतनः ।
त्रयोदशभिदाभिन्नविश्वेदेवाधिदैवतम् ॥ १४८ ॥

चतुर्दशेन्द्रवरदश्चतुर्दशमनुप्रभुः ।
चतुर्दशादिविद्याढ्यश्चतुर्दशजगत्प्रभुः ॥ १४९ ॥

सामपञ्चदशः पञ्चदशीशीतांशुनिर्मलः ।
षोडशाधारनिलयः षोडशस्वरमातृकः ॥ १५० ॥





षोडशान्तपदावासः षोडशेन्दुकलात्मकः ।
कलासप्तदशी सप्तदशः सप्तदशाक्षर ॥ १५१ ।

अष्टादशद्वीपपतिरष्टादशपुराणकृत् ।
अष्टादशौषधीसृष्टिरष्टादशविधिस्मृतः ॥ १५२ ॥

अष्टादशलिपिव्यष्टिसमष्टिज्ञानकोविदः ।
एकविंशः पुमानेकविंशत्यङ्गुलिपल्लवः ॥ १५३ ॥

चतुर्विंशतितत्त्वात्मा पञ्चविंशाख्यपूरुषः ।
सप्तविंशतितारेशः सप्तविंशतियोगकृत् ॥ १५४ ॥

द्वात्रिंशद्भैरवाधीशश्चतुस्त्रिंशन्महाह्रदः ।
षट्त्रिंशत्तत्त्वसंभूतिरष्टात्रिंशत्कलातनुः ॥ १५५ ॥

नमदेकोनपञ्चाशन्मरुद्वर्गनिरर्गलः ।
पञ्चाशदक्षरश्रेणी पञ्चाशद्रुद्रविग्रहः ॥ १५६ ॥

पञ्चाशद्विष्णुशक्तीशः पञ्चाशन्मातृकालयः ।
द्विपञ्चाशद्वपुःश्रेणी त्रिषष्टयक्षरसंश्रयः ॥ १५७ ॥

चतुःषष्टयर्णनिर्णेता चतुःषष्टिकलानिधिः ।
चतुःषष्टिमहासिद्धयोगिनीवृन्दवन्दितः ॥ १५८ ॥

अष्टषष्टिमहातीर्थक्षेत्रभैरवभावनः ।
चतुर्नवतिमन्त्रात्मा षण्णवत्यधिकप्रभुः ॥ १५९ ॥

शतानन्दः शतधृतिः शतपत्रायतेक्षणः ।
शतानीकः शतमखः शतधारावरायुधः ॥ १६० ॥

सहस्रपत्रनिलयः सहस्रफलभूषणः ।
सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् ॥ १६१ ॥

सहस्रनामसंस्तुत्यः सहस्राक्षबलापहः ।
दशसाहस्रफणभृत्फणिराजकृतासनः ॥ १६२ ॥

अष्टाशीतिसहस्राद्यमहर्षिस्तोत्रयान्त्रितः ।
लक्षाधीशप्रियाधारो लक्षाधारमनोमयः ॥ १६३ ॥

चतुर्लक्षजपप्रीतश्चतुर्लक्षप्रकाशितः ।
चतुरशीतिलक्षाणां जीवानां देहसंस्थित. ॥ १६४ ॥

कोटिसूर्यप्रतीकाशः कोटिचन्द्रांशुनिर्मलः ।
शिवाभवाध्युष्टकोटिविनायकधुरन्धरः ॥ १६५ ॥

सप्तकोटिमहामन्त्रमन्त्रितावयवद्युतिः ।
त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणतपादुकः ॥ १६६ ॥

अनन्तनामानन्तश्रीरनन्ताऽनन्तसौख्यदः । ॐ ॥ १६७ ॥
इति वैनायकं नाम्नां सहस्रमिदमीरितम् ।
इदं ब्राह्मे मुहूर्ते यः पठति प्रत्यहं नरः ॥ १ ॥
करस्थं तस्य सकलमैहिकामुष्मिकं सुखम् ।
आयुरारोग्यमैश्वर्यं धैर्यं शौर्यं बलं यशः ॥ २ ॥

मेधा प्रज्ञा धृतिः कान्तिः सौभाग्यमतिरूपता ।
सत्यं दया क्षमा शान्तिर्दाक्षिण्यं धर्मशालिता ॥ ३ ॥

जगत्संयमनं विश्वसंवादो वादपाटवम् ।
सभापाण्डित्यमौदार्यं गाम्भीर्यं ब्रह्मवर्चसम् ॥ ४ ॥

औन्नत्यं च कुलं शीलं प्रतापो वीर्यमार्यता ।
ज्ञानं विज्ञानमास्तिक्यं स्थैर्यं विश्ववातिशायिता ॥ ५ ॥
धनधान्याभिवृद्धिश्च सकृदस्य जपाद् भवेत् ।
वश्यं चतुर्विधं नृणां जपादस्य प्रजायते ॥ ६ ॥
राज्ञो राजकलत्रस्य राजपुत्रस्य मन्त्रिणः ।
जप्यते यस्य वश्यार्थं सदासस्तस्य जायते ॥ ७ ॥
धर्मार्थकाममोक्षाणामनायासेन साधनम् ।
शाकिनीडाकिनीरक्षोयक्षोरगभयापहम् ॥ ८ ॥





साम्राज्यसुखदं चैव समस्तरिपुमर्दनम् ।
समस्तकलहध्वंसिदग्धबीजप्ररोहणम् ॥ ९ ॥

दुःस्वप्नाशनं क्रुद्धस्वामिचित्तप्रसादनम् ।
षट्कर्माष्टमहासिद्धित्रिकालज्ञानसाधनम् ॥ १० ॥

परकृत्याप्रशमनं परचक्रविमर्दनम् ।
सङ्ग्रामरङ्गे सर्वेषामिदमेकं जयावहम् ॥ ११ ॥

सर्ववन्ध्यात्वदोषघ्नं गर्भरक्षैककारणम् ।
पठ्यते प्रत्यहं यत्र स्तोत्रं गणपतेरिदम् ॥ १२ ॥

देशे तत्र न दुर्भिक्षमीतयो दुरितानि च ।
न तद्गृह जहाति श्रीयत्रायं पठ्यते स्तवः ॥ १३ ॥

क्षयकुष्ठप्रमेहार्शभगन्दरविषूचिकाः ।
गुल्मं प्लीहानमश्मानमतिसारं महोदरम् ॥ १४ ॥

कासं श्वासमुदावर्तं शूलं शोकादिसंभवम् ।
शिरोरोगं वमिं हिक्कां गण्डमालामरोचकम् ॥ १५ ॥

वातपित्तकफद्वन्द्वत्रिदोषजनितज्वरम् ।
आगन्तुविषमं शीतमुष्णं चैकाहिकादिकम् ॥ १६ ॥

इत्याद्युक्तमनुक्तं वा रोगं दोषादिसम्भवम् ।
सर्वं प्रशमयत्याशु स्तोत्रस्यास्य सकृज्जपः ॥ १७ ॥

सकृत्पाठेन संसिद्धः स्त्रीशूद्रपतितैरपि ।
सहस्रनाममन्त्रोयं जपितव्यः शुभाप्तये ॥ १८ ॥

महागणपतेः स्तोत्रं सकामः प्रजपन्निदं ।
इच्छया सकलान्भोगाननुभूयेह पार्थिवान् ॥ १९ ॥

मनोरथफलैर्दिव्यैर्व्योमयानैर्मनोरमैः ।
चन्द्रेन्द्रभास्करोपेन्द्रब्रह्मशर्वादिसद्मसु ॥ २० ॥

कामरूपः कामगतिः कामतो विचरन्निह ।
भुक्त्वा यथेप्सितान्भोगानभीष्टान्सहबन्धुभिः ॥ २१ ॥

गणेशानुचरो भूत्वा महागणपतेः प्रियः ।
नन्दीश्वरादिसानन्दी नन्दितः सकलैर्गणैः ॥ २२ ॥

शिवाभ्यां कृपया पुत्रनिर्विशेषं च लालितः ।
शिवभक्तः पूर्णकामो गणेश्वरवरात्पुनः ॥ २३ ॥

जातिस्मरो धर्मपरः सार्वभौमोऽभिजायते ।
निष्कामस्तु जपन्नित्यं भक्त्या विघ्नेशतत्परः ॥ २४ ॥

योगसिद्धिं परां प्राप्य ज्ञानवैराग्यसंस्थितः ।
निरन्तरोदितानन्दे परमानन्दसंविदि ॥ २५ ॥

विश्वोत्तीर्णे परेपारे पुनरावृत्तिवर्जिते ।
लीनो वैनायके धाम्नि रमते नित्यनिर्वृतः ॥ २६ ॥

यो नामभिर्हुनेदेतैरर्चयेत्पूजयेन्नरः ।
राजानो वश्यतां यान्ति रिपवो यान्ति दासताम् ॥ २७ ॥

मन्त्राः सिध्यन्ति सर्वेपि सुलभास्तस्य सिद्धयः ।
मूलमन्त्रादपि स्तोत्रमिदं प्रियतरं मम ॥ २८ ॥

नभस्ये मासि शुक्लायां चतुर्थ्यां मम जन्मनि ।
दूर्वाभिर्नामभिः पूजां तर्पणं विधिवच्चरेत् ॥ २९ ॥

अष्टद्रव्यैर्विशेषेण जुहुयाद्भक्तिसंयुतः ।
तस्येप्सितानि सर्वाणि सिध्यन्त्यत्र न संशयः ॥ ३० ॥

इदं प्रजप्तं पठितं पाठितं श्रावितं श्रुतम् ॥ ३१ ॥

व्याकृतं चर्चितं ध्यातं विमृष्टमभिनन्दितम् ।
इहामुत्र च सर्वेषां विश्वैश्वर्यप्रदायकम् ॥ ३२ ॥





स्वच्छन्दचारिणाप्येष येनायन्धार्यते स्तवः ।
स रक्ष्यते शिवोद्भूतैर्गणैरध्युष्टकोटिभिः ॥ ३३ ॥

पुस्तके लिखितं यत्र गृहे स्तोत्रं प्रपूजयेत् ।
तत्र सर्वोत्तमा लक्ष्मीः सन्निधत्ते निरन्तरम् ॥ ३४ ॥

दानैरशेषैरखिलैर्व्रतैश्च तीर्थैरशेषैरखिलैर्मखैश्च ।
न तत्फलं विन्दति यद्गणेशसहस्रनाम्नां स्मरणेन सद्यः ॥ ३५ ॥

एतन्नाम्नां सहस्रं पठति दिनमणौ प्रत्यहं प्रोज्जिहाने
सायं मध्यंदिने वा त्रिषवणमथवा सन्ततं वा जनो यः ।
स स्यादैश्वर्यधुर्यः प्रभवति च सतां कीर्तिमुच्चैस्तनोति
प्रत्यूहं हन्ति विश्वं वशयति सुचिरं वर्धते पुत्रपौत्रैः ॥ ३६ ॥

अकिञ्चनोपि मत्प्राप्तिचिन्तको नियताशनः ।
जपेत्तु चतुरो मासान् गणेशार्चनतत्परः ॥ ३७ ॥

दरिद्रतां समुन्मूल्य सप्तजन्मानुगामपि ।
लभते महतीं लक्ष्मीमित्याज्ञा पारमेश्वरी ॥ ३८ ॥

आयुष्यं वीतरोगं कुलमतिविमलं संपदश्चार्तदानाः
कीर्तिर्नित्यावदाता भणितिरभिनवा कान्तिरव्याधिभव्या ।
पुत्राः सन्तः कलत्रं गुणवदभिमतं यद्यदेतच्च सत्यम्
नित्यं यः स्तोत्रमेतत्पठतिगणपतेस्तस्य हस्ते समस्तम् ॥ ३९ ॥

गणञ्जयो गणपतिर्हेरम्बो धरणीधरः ।
महागणपतिर्लक्षप्रदः क्षिप्रप्रसादनः ॥ ४० ॥

अमोघसिद्धिरमृतो मन्त्रश्चिन्तामणिर्निधिः ।
सुमङ्गलो बीजमाशापूरको वरदः शिवः ॥ ४१ ॥

काश्यपो नन्दनो वाचासिद्धो ढुण्ढिविनायकः ।
मोदकैरेभिरत्रैकविंशत्या नामभिः पुमान् ॥ ४२ ॥

यः स्तौति मद्गतमना मदाराधनतत्परः ।
स्तुतो नाम्नां सहस्रेण तेनाहं नात्र संशयः ॥ ४३ ॥

नमोनमः सुरवरपूजिताङ्घ्रये नमो नमो निरुपममङ्गलात्मने ।
नमो नमो विपुलपदैकसिद्धये नमो नमः करिकलभाननाय ते ॥४४॥

इति श्रीगणेशपुराणे उपासनाखण्डे महागणपतिप्रोक्तं
गणेशसहस्रनामस्तोत्रं सम्पूर्णम् ॥

■



# श्रीविष्णु-सहस्रनामस्तोत्रम्

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥१॥

नमः समस्तभूतानामादिभूताय भूभृते ।
अनेकरूपरूपाय विष्णवे प्रभविष्णवे ॥२॥

वैशम्पायन उवाच—

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥३॥

युधिष्ठिर उवाच

किमेकं दैवतं लोके किं वाप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ॥४॥
को धर्मः सर्वधर्माणां भवतः परमो मतः ।
किं जपन्मुच्यते जंतुर्जन्मसंसारबन्धनात् ॥५॥

भीष्म उवाच—

जगत्प्रभुं देवदेवमनंतं पुरुषोत्तमम् ।
स्तुवन्नाम सहस्रेण पुरुषः सततोत्थितः ॥६॥

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायंस्तुवन्नमस्यंश्च यजमानस्तमेव च ॥७॥

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥८॥

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥९॥

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चयेन्नरः सदा ॥१०॥

परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यः महत् ब्रह्म परमं यः परायणम् ॥११॥

पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ।
दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥१२॥

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिश्च प्रलयं यान्ति पुनरेव युगक्षये ॥१३॥

तस्यलोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ॥१४॥

यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥१५॥

ऋषिर्नाम्ना सहस्रस्य वेदव्यासो महामुनिः ।
छंदोऽनुष्टुप्तथा देवो भगवान् देवकीसुतः ॥१६॥

विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम् ।
अनेकरूपं दैत्यांतं नमामि पुरुषोत्तमम् ॥१७॥

अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमहामहामंत्रस्य श्रीभगवान्वेदव्यास ऋषिः । अनुष्टुप्छंदः । श्रीकृष्णः परमात्मा श्रीमन्नारायणो देवता । अमृतोद्भवोभानुरिति बीजम् । देवकीनन्दनः स्रष्टेति शक्तिः त्रिसामासामगस्सामेति हृदयम् ॥ शंखभृन्नन्दकी चक्रीति कीलकम् । शार्ङ्गधन्वा गदाधर इत्यस्त्रम् । रथांगपाणिरक्षोभ्य इति कवचम् ॥ उद्भवः क्षोभणो देव इति परमो मंत्रः, श्रीकृष्ण प्रीत्यर्थं सहस्रनामस्तोत्रजपे विनियोगः ॥

अथ करन्यासः । ॐ उद्भवाय अङ्गुष्ठाभ्यां नमः । ॐ क्षोभणाय तर्जनीभ्यां नमः । ॐ देवाय मध्यमाभ्यां नमः । ॐ उद्भवाय अनामिकाभ्यां





नमः । ॐ क्षोभणाय कनिष्ठिकाभ्यां नमः । ॐ देवाय करतलकरपृष्ठाभ्यां नमः ॥ इति करन्यासः ।

अथ हृदयादिषडङ्गन्यासः । सुव्रतः सुमुखः सूक्ष्मः ज्ञानाय हृदयाय नमः । सहस्र मूर्धा विश्वात्मा ऐश्वर्याय शिरसे स्वाहा । सहस्रार्चिः सप्तजिह्वः शक्त्ये शिखायै वषट् । त्रिसामा सामगः सामबलाय कवचाय हुम् । रथांगपाणिरक्षोभ्यः तेजसे नेत्राभ्यां वौषट् । शार्ङ्गधन्वा गदाधरः वीर्याय अस्त्राय फट् । ऋतुः सुदर्शनः कालः भूर्भुवस्वरोम् दिग्बन्धः ॥ इति हृदयादिन्यासः ॥

अथ ध्यानम्

ॐ क्षीरदोऽन्वित्देशे शुचिमणि विलसत्सैकतैर्मौक्तिकानां
मालाक्लृप्ताऽसनस्थः स्फटिकमणिनिभैर्मौक्तिकैर्मण्डितांगः ।
शुभ्रैरभ्रैरदभ्रैरुपरिविरचितमुक्तपीयूषवर्षै-
रानन्दीनः पूनीयादरिनलिनगदाशंखपाणिर्मुकुन्दः ॥१॥

अथवा

भूः पादौ यस्य नाभिर्वियदसुरानिलश्चन्द्रसूर्यौ च नेत्रौ
कर्णावाशाशिरोद्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः ।
अन्तःसंस्थस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यै-
श्चित्रं रंरम्यते तंत्रिभुवनवपुषं विष्णुमीशं नमामि ॥२॥

अथवा

शांताकारं भुजगशयनं पद्मनाभं सुरेशं,
विश्वाधारं गगनसदृशं मेघवर्णं शुभांगम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं,
वंदे विष्णु भवभयहरं सर्वलोकैकनाथम् ॥३॥

अथवा

मेघश्यामं पीतकौशेयवासं श्रीवत्सांकं कौस्तुभोद्भासितांगम् ।
पुण्योपेतं पुण्डरीकायताक्षं विष्णुं वंदे सर्वलोकैकनाथम् ॥४॥

अथवा

सशंखचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षःस्थलकौस्तुभश्रियं नमामि विष्णुं शिरसा चतुर्भुजम् ॥५॥

ओं विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥१॥

पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥२॥

योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥३॥

सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥४॥

स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ॥५॥

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥६॥

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूतस्त्रिककुब्धाम पवित्रं मंगलं परम् ॥७॥

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥८॥

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥९॥

सुरेशः शरणं शर्म विश्वरेता प्रजाभवः ।
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥१०॥

अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ।
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥११॥

वसुर्वसुमनाः सत्यः समात्मा संमितः समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ॥१२॥





रुद्रोबहुशिराबभ्रुर्विश्वयोनिः शुचिश्रवा ।
अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः ॥१३॥

सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यंगो वेदांगो वेदवित् कविः ॥१४॥

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥१५॥

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥१६॥

उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।
अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥१७॥

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।
अतीन्द्रियो महामायो महोत्साहो महाबलः ॥१८॥

महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥१९॥

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।
अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः ॥२०॥

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥२१॥

अमृत्युः सर्वदृक् सिंहः सन्धाता सन्धिमान् स्थिरः ।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥२२॥

गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥२३॥

अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः ।
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥२४॥

आवर्त्तनो निवृत्तात्मा संवृतः सम्प्रमर्दनः ।
अहः संवर्त्तको वह्निरनिलो धरणीधरः ॥२५॥

सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ।
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥२६॥

असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।
सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ॥२७॥

वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥२८॥

सुभुजा दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।
नैकरूपा बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ २९॥

ओजस्तेजो द्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥३०॥

अमृतांशूद्भवो भानुः शशबिंदुः सुरेश्वरः ।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥३१॥

भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ॥३२॥

युगादिकृद्युगावर्तो नैकामयो महाशनः ।
अदृश्योऽव्यक्तरूपश्च सहस्रजिदनन्तजित् ॥३३॥

इष्टो विशिष्ट शिष्टेष्टः शिखंडी नहुषो वृषः ।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥३४॥

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥३५॥

स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥३६॥





अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥३७॥

पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ।
महर्द्धिऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥३८॥

अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिंजयः ॥३९॥

विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।
महीधरो महाभागो वेगवानमिताशनः ॥४०॥

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः ॥४१॥

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।
परर्द्धिः परमः स्पष्टस्तुष्टः पुष्टशुभेक्षणः ॥४२॥

रामो विरामो विरजो मार्गो नेयो नयोऽनयः ।
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥४३॥

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥४४॥

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥४५॥

विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययम् ।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥४६॥

अनिर्विण्णः स्थविष्ठो भूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥४७॥

यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥४८॥

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥४९॥

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥५०॥

धर्मगुब्धर्मकृद्धर्मी सदसत् क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥५१॥

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥५२॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥५३॥

सोमपोऽमृतपः सोमः पुरुजित्पुरुषोत्तमः ।
विनयोजयः सत्यसन्धो दाशार्हः सात्वतां पतिः ॥५४॥

जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥५५॥

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ॥५६॥

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाशृंगः कृतान्तकृत् ॥५७॥

महावराहो गोविन्दः सुषेणः कनकांगदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥५८॥

वेधाः स्वांगोऽजितः कृष्णो दृढः संकर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥५९॥

भगवान्भगहानन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥६०॥





सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिवस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥६१॥

त्रिसामा सामगः सामो निर्वाणभेषजं भिषक् ।
संन्यासकृच्छमः शान्तो निष्ठाशान्तिपरायण ॥६२॥

शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥६३॥

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ॥६४॥

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।
श्रीधर श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः ॥६५॥

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।
विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥६६॥

उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतः स्थिरः ।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥६७॥

अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥६८॥

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥६९॥

कामदेवः कामपालः कामी कान्तः कृतागमः ।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनंजयः ॥७०॥

ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥७१॥

महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥७२॥

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥७३॥

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥७४॥

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥७५॥

भूतवासो वासुदेवः सर्वासुनिलयोऽतले ।
दर्पहा दर्पदो दृप्तः दुर्धरोऽथापराजितः ॥७६॥

विश्वमूर्तिर्महामूर्तिर्दीप्तिमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥७७॥

एकोऽनेकः सवः कः किं यत्तत्पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥७८॥

सुवर्णवर्णो हेमांगो वरांगश्चन्दनांगदी ।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥७९॥

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥८०॥

तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृंगो गदाग्रजः ॥८१॥

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥८२॥

समावर्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥८३॥

शुभांगो लोकसारंगः सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥८४॥





उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृंगी जयन्तस्सर्वविज्जयी ॥८५॥

सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः ॥८६॥

कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।
अमृतांशोऽमृतवपुः शुभ्रांगः सर्वतोमुखः ॥८७॥

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधो दुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥८८॥

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ॥८९॥

अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥९०॥

भारतभृत् स्थितो योगी योगीशः सर्वकामदः ।
आश्रमः श्रमणः क्षामः सुवर्णो वायुवाहनः ॥९१॥

धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजितः सर्वसहो नियन्ता नियमो यमः ॥९२॥

सत्त्ववान्सात्त्विकः सत्यः सत्यधर्मपरायणः ।
अभिप्रियः प्रियार्होऽर्हः प्रियकृत्प्रीतिवर्धनः ॥९३॥

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनः सूर्यः सविता रविलोचनः ॥९४॥

अनन्तो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः ।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥९५॥

सनात्सनातनतमः कपिलः कपिरव्ययः ।
स्वस्तिदः स्वस्तिकृत् स्वस्ति स्वस्तिभुक् स्वस्तिदक्षिणः ॥९६॥

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः शिशिरः शर्वराकरः ॥९७॥

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥९८॥

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।
वीरहा रक्षणः शान्तो जीवनः पर्यवस्थितः ॥९९॥

अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरस्रोगभीरात्मा विदिशा व्यादिशो दिशः ॥१००॥

अनादिर्भूर्भुवो लक्ष्मीः सुवारो रुचिरांगदः ।
जननोजन जन्मादिर्भीमो भीमपराक्रमः ॥१०१॥

आधारनिलयो धाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥१०२॥

प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः ।
तत्त्वतत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥१०३॥

भूर्भुवः स्वस्तरुस्तारः स पिता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥१०४॥

यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ।
यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च ॥१०५॥

आत्मयोनिः स्वयंजातो वैखानः सामगायनः ।
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः ॥१०६॥

शंखभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।
रथांगपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥१०७॥

सर्वप्रहरणायुधः ॐ नमः इति ॥





इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ॥१०८॥

य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात्किंचित् सोऽमुत्रेह च मानवः ॥१०९॥

वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ॥११०॥

धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजाः ॥१११॥

भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥११२॥

यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥११३॥

न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।
भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ॥११४॥

रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥११५॥

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥११६॥

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥११७॥

न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥११८॥

इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षान्ति श्रीधृतिस्मृतिकीर्तिभिः ॥११९॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥१२०॥

द्यौ सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥१२१॥

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।
जगद्वशे वर्ततेऽदः कृष्णस्य सचराचरम् ॥१२२

इन्द्रियाणि मनोबुद्धिः सत्त्वं तेजो बलं धृति ।
वासुदेवात्मकान्याहुः क्षेत्रक्षेत्रज्ञ एव हि ॥१२३॥

सर्वागमानामाचारः प्रथमं परिकल्पते ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥१२४॥

ऋषयः पितरो देवा महाभूतानि धातवः ।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ॥१२५॥

योगांगानि तथा सांख्यं विद्याः शिल्पादिकर्म च ।
वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् ॥१२६॥

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रीन् लोकान् व्याप्य भूतात्मा भुंक्ते विश्वभुगव्ययः ॥१२७॥

इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥१२८॥

विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ॥१२९॥

अर्जुन उवाच

पद्मपत्रविशालाक्ष पद्मनाभ सुरोत्तम ।
भक्तानामनुरक्तानां त्राता भव जनार्दन ॥१३०॥





श्रीभगवानुवाच

यो मां नामसहस्रेण स्तोतुमिच्छति पाण्डव ।
सोऽहमेकेन श्लोकेन स्तुत एव न संशयः ॥१३१॥

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥१३२॥

नमः कमलनाभाय नमस्ते जलशायिने ।
नमस्ते केशवानन्त वासुदेव नमोऽस्तु ते ॥१३३॥

वासनाद्वासुदेवस्य वासितं भुवनत्रयम् ।
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते ॥१३४॥

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥१३५॥

आकाशात्पतितं तोयं यथा गच्छति सागरम् ।
सर्वदेवनमस्कारः केशवं प्रतिगच्छति ॥१३६॥

एष निष्कण्टकः पन्था यत्र संपूज्यते हरिः ।
कुपथं तं विजानीयाद् गोविन्दरहितागमम् ॥१३७॥

सर्ववेदेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ।
तत्फलं समवाप्नोति स्तुत्वा देवं जनार्दनम् ॥१३८॥

यो नरः पठते नित्यं त्रिकालं केशवालये ।
द्विकालमेककालं वा क्रूरं सर्वं व्यपोहति ॥१३९॥

दह्यन्ते रिपवस्तस्य सौम्याः सर्वे सदा ग्रहाः ।
विलीयन्ते च पापानि स्तवे ह्यस्मिन्प्रकीर्तिते ॥१४०॥

येन ध्यातः श्रुतो येन येनायं पठितः स्तवः ।
दत्तानि सर्वदानानि सुरा सर्वे समर्चिताः ॥१४१॥

इह लोके परे वापि न भयं विद्यते क्वचित् ।
नाम्नां सहस्रं योऽधीते द्वादश्यां मम सन्निधौ ॥१४२॥

स निर्दहति पापानि कल्पकोटिशतानि च ।
अश्वत्थसन्निधौ पार्थ कृत्वा मनसि केशवम् ॥१४३॥

पठेन्नामसहस्रं तु गवां कोटिफलं लभेत् ।
शिवालये पठन्नित्यं तुलसीवनसंस्थितः ॥१४४॥

नरो मुक्तिमवाप्नोति चक्रपाणेर्वचो यथा ।
ब्रह्महत्यादिकं पापं सर्वं सद्यो विनश्यति ॥१४५॥

इति श्रीमन्महाभारते शतसाहस्र्यांसंहितायां वैयासिक्यामानुशासनिके
पर्वणि दानधर्मे भीष्मयुधिष्ठिरसंवादे श्रीविष्णोर्दिव्य-
सहस्रनामस्तोत्रं सम्पूर्णम् ॥

■



# श्रीशिव-सहस्रनामस्तोत्रम्

सूत उवाच

श्रूयतामृषयः श्रेष्ठाः कथयामि यथा श्रुतम्
विष्णुना प्रार्थितो येन संतुष्टः परमेश्वरः ।
तदहं कथयाम्यद्य पुण्यं नामसहस्रकम् ॥ १ ॥

श्रीविष्णुरुवाच

शिवो हरो मृडो रुद्रः पुष्करः पुष्पलोचनः ।
अर्थिगम्यः सदाचारः शर्वः शंभुर्महेश्वरः ॥ २ ॥

चंद्रापीडश्चन्द्रमौलिर्विश्वं विश्वामरेश्वर ।
वेदांतसारसंदोहः कपाली नीललोहितः ॥ ३ ॥

ध्यानाधारोऽपरिच्छेद्यो गौरीभर्ता गणेश्वरः ।
अष्टमूर्तिर्विश्वमूर्तिस्त्रिवर्गस्वर्गसाधनः ॥ ४ ॥

ज्ञानगम्यो दृढप्रज्ञो देवदेवस्त्रिलोचनः ।
वामदेवो महादेवः पटुः परिवृढो दृढः ॥ ५ ॥

विश्वरूपो विरूपाक्षो वागीशः शुचिसत्तमः ।
सर्वप्रमाणसंवादी वृषाङ्को वृषवाहनः ॥ ६ ॥

ईशः पिनाकी खट्वांगी चित्रवेषश्चिरंतनः ।
तमोहरो महायोगी गोप्ता ब्रह्मा च धूर्जटिः ॥ ७ ॥

कालकालः कृत्तिवासाः सुभगः प्रणवात्मकः ।
उन्नध्रः पुरुषो जुष्यो दुर्वासाः पुरशासनः ॥ ८ ॥

दिव्यायुधः स्कंदगुरुः परमेष्ठी परात्परः ।
अनादिमध्यनिधनो गिरीशो गिरिजाधवः ॥ ९ ॥

कुबेरबंधु: श्रीकंठो लोकवर्णोत्तमो मृदु: ।
समाधिवेद्य: कोदंडी नीलकंठ: परश्वधी: ॥ १० ॥

विशालाक्षो मृगव्याध: सुरेश: सूर्यतापन: ।
धर्मधामक्षमाक्षेत्रं भगवान्भगनेत्रभित् ॥ ११ ॥

उग्र: पशुपतिस्तार्क्ष्य: प्रियभक्त: परंतप: ।
दाता दयाकरो दक्ष: कर्मंदी कामशासन: ॥ १२ ॥

श्मशाननिलय: सूक्ष्म: श्मशानस्थो महेश्वर: ।
लोककर्त्ता मृगपतिर्महाकर्त्ता महौषधि: ॥ १३ ॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्य: पुरातन: ।
नीति: सुनीति: शुद्धात्मा सोम: सोमरत: सुखी ॥ १४ ॥

सोमपोऽमृतप: सौम्यो महातेजा महाद्युति: ।
तेजोमयोऽमृतमयोऽन्नमयश्च सुधापति: ॥ १५ ॥

अजातशत्रुरालोक: संभाव्यो हव्यवाहन: ।
लोककरो वेदकर: सूत्रकार: सनातन: ॥ १६ ॥

महर्षिकपिलाचार्यो विश्वदीप्तिस्त्रिलोचन: ।
पिनाकपाणिर्भूदेव: स्वस्तिद: स्वस्तिकृत्सुधी: ॥ १७ ॥

धातृधामा धामकर: सर्वग: सर्वगोचर: ।
ब्रह्मसृग्विश्वसृक्सर्ग: कर्णिकार: प्रिय: कवि: ॥ १८ ॥

शाखो विशाखो गोशाख: शिवो भिषगनुत्तम: ।
गंगाप्लवोदको भव्य: पुष्कल: स्थपति: स्थिर: ॥ १९ ॥

विजितात्मा विधेयात्मा भूतवाहनसारथि: ।
सगणो गणकायश्च सुकीर्तिश्छिन्नसंशय: ॥ २० ॥

कामदेव: कामपालो भस्मोद्धूलितविग्रह: ।
भस्मप्रियो भस्मशायी कामी कांत: कृतागम: ॥ २१ ॥





समावर्तो निवृत्तात्मा धर्मपुंज: सदाशिव: ।
अकल्मषश्चतुर्बाहुर्दुरावासो दुरासद: ॥२२॥

दुर्लभो दुर्गमो दुर्ग: सर्वायुधविशारद: ।
अध्यात्मयोगनिलय: सुतंतुस्तंतुवर्धन: ॥२३॥

शुभांगो लोकसारंगो जगदीशो जनार्दन: ।
भस्मशुद्धिकरो मेरुरोजस्वी शुद्धविग्रह: ॥२४॥

असाध्य: साधुसाध्यश्च भृत्यमर्कटरूपधृक् ।
हिरण्यरेता: पौराणो रिपुजीवहरो बल: ॥२५॥

महाह्रदो महागर्त्त: सिद्धवृंदारवंदित ।
व्याघ्रचर्मांबरो व्याली महाभूतो महानिधि: ॥२६॥

अमृताशोऽमृतवपु: पांचजन्य: प्रभंजन: ।
पंचविंशतितत्त्वस्थ: पारिजात: परावर: ॥२७॥

सुलभ: सुव्रत: शूरो ब्रह्मवेदनिधिर्निधि: ।
वर्णाश्रमगुरुर्वर्णी शत्रुजिच्छत्रुतापन: ॥२८॥

आश्रम: क्षपण: क्षामो ज्ञानवानचलेश्वर: ।
प्रमाणभूतो दुर्ज्ञेय: सुपर्णो वायुवाहन: ॥२९॥

धनुर्धरो धनुर्वेदो गुणराशिर्गुणाकर: ।
सत्य: सत्यपरो दीनो धर्मांगो धर्मसाधन: ॥३०॥

अनंतदृष्टिरानंदो दंडो दमयिता दम: ।
अभिवाद्यो महामायो विश्वकर्मा विशारद: ॥३१॥

वीतरागो विनीतात्मा तपस्वी भूतभावन: ।
उन्मत्तवेष: प्रच्छन्नो जितकामोऽजितप्रिय: ॥३२॥

कल्याणप्रकृति: कल्प: सर्वलोकप्रजापति: ।
तरस्वी तारको धीमान्प्रधानप्रभुरव्यय: ॥३३॥

लोकपालोऽन्तर्हितात्मा कल्पादिः कमलेक्षणः ।
वेदशास्त्रार्थतत्त्वज्ञोऽनियमो नियताश्रयः ॥३४॥

चंद्रः सूर्यः शनिः केतुर्वरांगो विद्रुमच्छविः ।
भक्तिवश्यः परब्रह्म मृगबाणार्पणोऽनघः ॥३५॥

अद्रिरद्र्यालयः कांतः परमात्मा जगद्‌गुरुः ।
सर्वकर्मालयस्तुष्टो मंगल्यो मङ्गलावृतः ॥३६॥

महातपा दीर्घतपाः स्थविष्ठः स्थविरो ध्रुवः ।
अहः संवत्सरो व्याप्तिः प्रमाणं परमं तपः ॥३७॥

संवत्सरकरो मंत्रप्रत्ययः सर्वदर्शनः ।
अजः सर्वेश्वरः सिद्धो महारेता महाबलः ॥३८॥

योगीयोग्यो महातेजाः सिद्धिः सर्वादिरग्रहः ।
वसुर्वसुमनाः सत्यः सर्वपापहरो हरः ॥३९॥

सुकीर्तिः शोभनः श्रीमानवाङ्मनसगोचरः ।
अमृतः शाश्वतः शांतो बाणहस्तः प्रतापवान् ॥४०॥

कमंडलुधरो धन्वी वेदांगो वेदविन्मुनिः ।
भ्राजिष्णुर्भोजनं भोक्ता लोकनाथो दुराधरः ॥४१॥

अतींद्रियो महामायः सर्ववासश्चतुष्पथः ।
कालयोगी महानादो महोत्साहो महाबलः ॥४२॥

महाबुद्धिर्महावीर्यो भूतचारी पुरंदरः ।
निशाचरः प्रेतचारी महाशक्तिर्महाद्युतिः ॥४३॥

अनिर्देश्यवपुः श्रीमान्सर्वाचार्यमनोगतिः ।
बहुश्रुतोमहामायो नियतात्मा ध्रुवोऽध्रुवः ॥४४॥

ओजस्तेजो द्युतिधरो नर्तकः सर्वशासकः ।
नृत्यप्रियो नृत्यनित्यः प्रकाशात्मा प्रकाशकः ॥४५॥





स्पष्टाक्षरो बुधो मंत्रः समानः सारसंप्लवः ।
युगादिकृद्युगावर्तो गंभीरो वृषवाहनः ॥४६॥

इष्टो विशिष्टः शिष्टेष्ट शलभः शरभो धनुः ।
तीर्थरूपस्तीर्थनामा तीर्थदृश्यः स्तुतोऽर्थदः ॥४७॥

अपांनिधिरधिष्ठानं विजयो जयकालवित् ।
प्रतिष्ठितः प्रमाणज्ञो हिरण्यकवचो हरिः ॥४८॥

विमोचनः सुरगणो विद्येशो विंदुसंश्रयः ।
बालरूपो बलोन्मत्तो विकर्ता गहनो गुहः ॥४९॥

करणं कारणं कर्ता सर्वबंधविमोचनः ।
व्यवसायो व्यवस्थानः स्थानदो जगदादिजः ॥५०॥

गुरुदो ललितोऽभेदो भावात्मात्मनि संस्थितः ।
वीरेश्वरो वीरभद्रो वीरासनविधिर्विराट् ॥५१॥

वीरचूड़ामणिर्वेत्ता तीव्रानंदो नदीधरः ।
आज्ञाधारस्त्रिशूली च शिपिविष्टः शिवालयः ॥५२॥

बालखिल्यो महाचापस्तिग्मांशुर्बधिरः खगः ।
अभिरामः सुशरणः सुब्रह्मण्यः सुधापतिः ॥५३॥

मघवान्कौशिको गोमान्विरामः सर्वसाधनः ।
ललाटाक्षो विश्वदेहः सारः संचारचक्रभृत् ॥५४॥

अमोघदंडो मध्यस्थो हिरण्यो ब्रह्मवर्चसी ।
परमार्थः परो मायी शंबरो व्याघ्रलोचनः ॥५५॥

रुचिर्विरंचिः स्वर्बंधुर्वाचस्पतिरहर्पतिः ।
रविर्विरोचनः स्कंदः शास्ता वैवस्वतो यमः ॥५६॥

युक्तिरुन्नतकीर्तिश्च सानुरागः परंजयः ।
कैलासाधिपतिः कांतः सविता रविलोचनः ॥५७॥

विद्वत्तमो वीतभयो विश्वभर्ताऽनिवारितः ।
नित्यो नियतकल्याणः पुण्यश्रवणकीर्तनः ॥५८॥

दूरश्रवा विश्वसहो ध्येयो दुःस्वप्ननाशनः ।
उत्तारणो दुष्कृतिहा विज्ञेयो दुःसहोऽभवः ॥५९॥

अनादिर्भूर्भुवो लक्ष्मीः किरीटी त्रिदशाधिपः ।
विश्वगोप्ता विश्वकर्ता सुवीरो रुचिरांगदः ॥६०॥

जननो जनजन्मादिः प्रीतिमान्नीतिमान्धवः ।
वसिष्ठः कश्यपो भानुर्भीमो भीमपराक्रमः ॥६१॥

प्रणवः सत्पथाचारो महाकोशो महाधनः ।
जन्माधिपो महादेवः सकलागमपारगः ॥६२॥

तत्त्वं तत्त्वविदेकात्मा विभुर्विश्वविभूषणः ।
ऋषिर्ब्राह्मण ऐश्वर्यजन्ममृत्युजरातिगः ॥६३॥

पंचयज्ञसमुत्पत्तिर्विश्वेशो विमलोदयः ।
आत्मयोनिरनाद्यन्तो वत्सलो भक्तलोकधृक् ॥६४॥

गायत्रीवल्लभः प्रांशुर्विश्वावासः प्रभाकरः ।
शिशुर्गिरिरतः सम्राट् सुषेणः सुरशत्रुहा ॥६५॥

अमोघोऽरिष्टनेमिश्च कुमुदो विगतज्वरः ।
स्वयंज्योतिस्तनुज्योतिरात्मज्योतिरचंचलः ॥६६॥

पिंगलः कपिलश्मश्रुर्भालनेत्रस्त्रयीतनुः ।
ज्ञानस्कन्दो महानीतिर्विश्वोत्पत्तिरुपप्लवः ॥६७॥

भगो विवस्वानादित्यो योगपारो दिवस्पतिः ।
कल्याणगुणनामा च पापहापुण्यदर्शनः ॥६८॥

उदारकीर्तिरुद्योगी सद्योगी सदसन्मयः ।
नक्षत्रमाली नाकेशः स्वाधिष्ठानपदाश्रयः ॥६९॥





पवित्रः पापहारी च मणिपूरो नभोगतिः ।
हृत्पुंडरीकमासीनः शक्रः शांतो वृषाकपिः ॥७०॥

उष्णो गृहपतिः कृष्णः समर्थोऽनर्थनाशनः ।
अधर्मशत्रुरज्ञेयः पुरुहूतः पुरुश्रुतः ॥७१॥

ब्रह्मगर्भो बृहद्गर्भो धर्मधेनुर्धनागमः ।
जगद्धितैषी सुगतः कुमारः कुशलागमः ॥७२॥

हिरण्यवर्णो ज्योतिष्मान्नानाभूतरतो ध्वनिः ।
अरागो नयनाध्यक्षो विश्वमित्रो धनेश्वरः ॥७३॥

ब्रह्मज्योतिर्वसुधामा महाज्योतिरनुत्तमः ।
मातामहो मातरिश्वा नभस्वान्नागहारधृक् ॥७४॥

पुलस्त्यः पुलहोऽगस्त्यो जातूकर्ण्यः पराशरः ।
निरावरणनिर्वारो वैरंच्यो विष्टरश्रवाः ॥७५॥

आत्मभूरनिरुद्धोऽत्रिर्ज्ञानमूर्तिर्महायशाः ।
लोकवीराग्रणीर्वीरश्चण्डः सत्यपराक्रमः ॥७६॥

व्यालाकल्पो महाकल्पः कल्पवृक्षः कलाधरः ।
अलंकरिष्णुरचलो रोचिष्णुर्विक्रमोन्नतः ॥७७॥

आयुःशब्दपतिर्वेगी प्लवनः शिखिसारथिः ।
असंसृष्टोऽतिथिः शक्रप्रमाथी पादपासनः ॥७८॥

वसुश्रवा हव्यवाहः प्रतप्ता विश्वभोजनः ।
जप्यो जरादिशमनो लोहितात्मा तनूनपात् ॥७९॥

बृहदश्वो नभोयोनिः सुप्रतीकस्तमिस्रहा ।
निदाघस्तपनो मेघः स्वक्षः परपुरंजयः ॥८०॥

सुखानिलः सुनिष्पन्नः सुरभिः शिशिरात्मकः ।
वसंतो माधवो ग्रीष्मो नभस्यो बीजवाहनः ॥८१॥

अंगिरागुरुरात्रेयो विमलो विश्वपावनः ।
पावनः सुमतिर्विद्वांस्त्रैविद्यो नरवाहनः ॥८२॥

मनोबुद्धिरहंकारः क्षेत्रज्ञः क्षेत्रपालकः ।
जमदग्निर्बलनिधिर्विगालो विश्वगालवः ॥८३॥

अघोरोऽनुत्तरो यज्ञः श्रेयो निःश्रेयसांपथः ।
शैलो गगनकुन्दाभो दानवारिररिंदमः ॥८४॥

रजनीजनकश्चारुविशल्यो लोककल्पधृक् ।
चतुर्वेदश्चतुर्भावश्चतुरश्चतुरप्रियः ॥८५॥

आम्नायोऽथ समाम्नायस्तीर्थदेवशिवालयः ।
बहुरूपो महारूपः सर्वरूपश्चराचरः ॥८६॥

न्यायनिर्मायको न्यायी न्यायगम्यो निरन्तरः ।
सहस्रमूर्धा देवेन्द्रः सर्वशस्त्रप्रभञ्जनः ॥८७॥

मुंडो विरूपो विक्रांतो दण्डी दान्तो गुणोत्तमः ।
पिंगलाक्षो जनाध्यक्षो नीलग्रीवो निरामयः ॥८८॥

सहस्रबाहुः सर्वेशः शरण्यः सर्वलोकधृक् ।
पद्मासनः परंज्योति परंपारः परंफलम् ॥८९॥

पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः ।
चराचरज्ञो वरदो वरेशस्तु महाबलः ॥९०॥

देवासुरगुरुर्देवो देवासुरमहाश्रयः ।
देवादिदेवो देवाग्निर्देवाग्निसुखदः प्रभुः ॥९१॥

देवासुरेश्वरो दिव्यो देवासुरमहेश्वरः ।
देवदेवमयोऽचिंत्यो देवदेवात्मसम्भवः ॥९२॥

सद्योनिरसुरव्याघ्रो देवसिंहो दिवाकरः ।
विबुधाग्रवरश्रेष्ठः सर्वदेवोत्तमोत्तमः ॥९३॥





शिवज्ञानरतः श्रीमाञ्छिखिश्रीपर्वतप्रियः ।
वज्रहस्तः सिद्धिखड्गी नरसिंहनिपातनः ॥ ९४ ॥

ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः ।
नंदी नंदीश्वरोऽनंतो नग्नव्रतधरः शुचिः ॥ ९५ ॥

लिंगाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः ।
स्वधर्मा स्वर्गतः स्वर्गस्वरः स्वरमयस्वनः ॥ ९६ ॥

बाणाध्यक्षो बीजकर्ता धर्मकृद्धर्मसम्भवः ।
दंभोऽलोभोऽर्थविच्छंभुः सर्वभूतमहेश्वरः ॥ ९७ ॥

श्मशाननिलयस्त्र्यक्षः सेतुरप्रतिमाकृतिः ।
लोकोत्तरस्फुटालोकस्त्र्यंबको नागभूषणः ॥ ९८ ॥

अंधकारिर्मखद्वेषी विष्णुकंधरपातनः ।
हीनदोषोऽक्षयगुणो दक्षारिः पूषदंतभित् ॥ ९९ ॥

धूर्जटिः खंडपरशुः सकलो निष्कलोऽनघः ।
अकालः सकलाधारः पांडुराभो मृडो नटः ॥ १०० ॥

पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः ।
सामगेयप्रियोऽक्रूरः पुण्यकीर्तिरनामयः ॥ १०१ ॥

मनोजवस्तीर्थकरो जटिलो जीवितेश्वरः ।
जीवितांतकरो नित्यो वसुरेता वसुप्रदः ॥ १०२ ॥

सद्गतिः सत्कृतिः सिद्धिः सज्जातिः कालकंटकः ।
कलाधरो महाकालो भूतसत्यपरायणः ॥ १०३ ॥

लोकलावण्यकर्ता च लोकोत्तरसुखालय ः ।
चंद्रसंजीवनः शास्ता लोकगूढो महाधिपः ॥ १०४ ॥

लोकबन्धुर्लोकनाथः कृतज्ञः कीर्तिभूषणः ।
अनपायोऽक्षरः कांतः सर्वशस्त्रभृतांवरः ॥ १०५ ॥

तेजोमयो द्युतिधरो लोकानामग्रणीरणुः ।
शुचिस्मितः प्रसन्नात्मा दुर्जेयो दुरतिक्रमः ॥१०६॥

ज्योतिर्मयो जगन्नाथो निराकारो जलेश्वरः ।
तुंबवीणो महाकोपो विशोकः शोकनाशनः ॥१०७॥

त्रिलोकपस्त्रिलोकेशः सर्वशुद्धिरधोक्षजः ।
अव्यक्तलक्षणो देवो व्यक्ताव्यक्तो विशांपतिः ॥१०८॥

वरशीलो वरगुणः सारो मानधनो मयः ।
ब्रह्मा विष्णुः प्रजापालो हंसो हंसगतिर्वयः ॥१०९॥

वेधा विधाता धाता च स्रष्टा हर्ता चतुर्मुखः ।
कैलासशिखरावासी सर्वावासी सदागतिः ॥११०॥

हिरण्यगर्भो द्रुहिणो भूतपालोऽथ भूपतिः ।
सद्योगी योगविद्योगी वरदो ब्राह्मणप्रियः ॥१११॥

देवप्रियो देवनाथो देवज्ञो देवचिन्तकः ।
विषमाक्षो विशालाक्षो वृषदो वृषवर्धनः ॥११२॥

निर्ममो निरहंकारो निर्मोहो निरुपद्रवः ।
दर्पहा दर्पदो दृप्तः सर्वर्तुपरिवर्तकः ॥११३॥

सहस्रजित्सहस्रार्चिः स्निग्धप्रकृतिदक्षिणः ।
भूतभव्यभवन्नाथः प्रभवो भूतिनाशनः ॥११४॥

अर्थोऽनर्थो महाकोशः परकार्यैकपंडितः ।
निष्कंटकः कृतानन्दो निर्व्याजो व्याजमर्दनः ॥११५॥

सत्त्ववान्सात्त्विकः सत्यकीर्तिः स्नेहकृतागमः ।
अकंपितो गुणग्राही नैकात्मा नैककर्मकृत् ॥११६॥

सुप्रीतः सुमुखः सूक्ष्मः सुकरो दक्षिणानिलः ।
नन्दिस्कंधधरो धुर्यः प्रकटः प्रीतिवर्धनः ॥११७॥





सर्वसत्त्वोऽपराजितः गोविंदः सत्त्ववाहनः ।
अधृतः स्वधृतः सिद्धः पूतमूर्तिर्यशोधनः ॥११८॥

वाराहशृङ्गधृक्छृङ्गी बलवानेकनायकः ।
श्रुतिप्रकाशः श्रुतिमानेकबन्धुरनेककृत् ॥११९॥

श्रीवत्सलशिवारम्भः शांतभद्रः समोयशः ।
भूशयो भूषणो भूतिर्भूतकृद्भूतभावनः ॥१२०॥

अकम्पो भक्तिकायस्तु कालहा नीललोहितः ।
सत्यव्रतमहात्यागी नित्यशांतिपरायणः ॥१२१॥

परार्थवृत्तिर्वरदो विविक्षुस्तु विशारदः ।
शुभदः शुभकर्ता च शुभनामा शुभः स्वयम् ॥१२२॥

अनर्थितोऽगुणः साक्षी ह्यकर्ता कनकप्रभः ।
स्वभावभद्रो मध्यस्थः शीघ्रगः शीघ्रनाशनः ॥१२३॥

शिखण्डी कवची शूली जटी मुण्डी च कुण्डली ।
अमृत्युः सर्वदृक्सिंहस्तेजोराशिर्महामणिः ॥१२४॥

असंख्येयोऽप्रमेयात्मा वीर्यवान्वीर्यकोविदः ।
वेद्यश्चैव वियोगात्मा परावरमुनीश्वरः ॥१२५॥

अनुत्तमो दुराधर्षो मधुरप्रियदर्शनः ।
सुरेशः शरणं सर्वः शब्दब्रह्म सतांगतिः ॥१२६॥

कालपक्षः कालकारी कंकणीकृतवासुकिः ।
महेष्वासो महीभर्ता निष्कलंको विशृंखलः ॥१२७॥

द्युमणिस्तरणिर्धन्यः सिद्धिदः सिद्धिसाधनः ।
विश्वतःसंवृतः स्तुत्यो व्यूढोरस्को महाभुजः ॥१२८॥

सर्वयोनिर्निरातंको नरनारायणप्रियः ।
निर्लेपो निष्प्रपञ्चात्मा निर्व्यङ्गो व्यङ्गनाशनः ॥१२९॥

स्तव्यः स्तवप्रियः स्तोता व्यासमूर्तिर्निरङ्कुशः ।
निरवद्यमयोपायो विद्याराशी रसप्रियः ॥१३०॥

प्रशान्तबुद्धिरक्षुण्णः संग्रही नित्यसुन्दरः ।
वैयाघ्रधुर्यो धात्रीशः शाकल्यः शर्वरीपतिः ॥१३१॥

परमार्थगुरुर्दृष्टिः शरीराश्रितवत्सलः ।
सोमो रसज्ञो रसदः सर्वसत्त्वावलम्बनः ॥१३२॥

एवं नाम्नां सहस्रेण तुष्टाव वृषभध्वजम् ।
प्रार्थयामास शम्भुं च पूजयामास पङ्कजैः ॥१३३॥

परीक्षार्थं हरेस्त्वीशः कमलेषु महेश्वरः ।
गोपयामास कमलं तदेकं भुवनेश्वरः ॥१३४॥

हृदि विचारितं तेन कुतो वै कमलं गतम् ।
यातु यातु सुखेनैव नेत्रं किं कमलं न हि ॥१३५॥

ज्ञात्वा तु नेत्रमुद्धृत्य सर्वसत्त्वावलम्बनम् ।
पूजयामास भावेन स्तवेनाऽनेन सर्वथा ॥१३६॥

मामेति व्याहरन्नेव प्रादुरासीज्जगद्गुरुः ।
ततस्तु तमथो दृष्ट्वा तथाभूतं हरो हरिम् ॥१३७॥

तस्मादवततारासु मण्डलात्पार्थिवस्य सः ।
यथोक्तरूपिणं शंभुं ते गोराशिं समुत्थितम् ॥१३८॥

नमस्कृत्य पुरः स्थित्वा स्तुतिं कृत्वा विशेषतः ।
पूजयामास देवेशः पार्वत्या सहितं शिवम् ॥१३९॥

प्रसन्नवदनो भूत्वा शम्भोश्च सम्मुखे स्थितः ।
इत्थंभूतं हरौ दृष्ट्वा कोटिभास्करभूषितः ॥१४०॥
प्राणिनामीश्वरः शम्भुर्देवदेवो जनार्दनम् ।
तदा प्राह महादेवः प्रहसन्निव शंकरः ।
सप्रेक्षमाणं तं विष्णुं कृताञ्जलिपुटं स्थितम् ॥१४१॥





शङ्कर उवाच

ज्ञातं मयेदं सकलं देवकार्यं जनार्दन ।
सुदर्शनाख्यं चक्रं च ददामि तव शोभनम् ॥१४२॥

यद्रूपं भवता दृष्टं सर्वलोकसुखावहम् ।
हिताय तव देवेश कृतं भावय सुव्रत ॥१४३॥

रणाजिरेऽपि संस्मृत्य देवानां दुःखनाशनम् ।
इदं चक्रमिदं रूपमिदं नामसहस्रकम् ॥१४४॥
ये शृण्वंति सदा भक्त्या सिद्धिः स्यादनपायिनी ।
एवमुक्त्वा ददौ चक्रं सूर्यायुतसमप्रभम् ॥१४५॥

विष्णुरपि च संस्नात्वा जग्राहोदङ्मुखस्तदा ।
नमस्कृत्य तदा देवः पुनर्वचनमब्रवीत् ॥१४६॥
शृणु देव मया ध्येयं पठनीयं च मे प्रभो ।
दुःखानां नाशनार्थं हि वद त्वं लोकशङ्कर ॥१४७॥

इति पृष्टस्तदा तेन संतुष्टस्तु शिवोऽब्रवीत् ।
रूपं ध्येयं मदीयं वै सर्वानर्थप्रशांतये ॥१४८॥

अनेकदुःखनाशार्थं पाठ्यं नामसहस्रकम् ।
धार्यं चक्रं सदा मेऽद्य सर्वानर्थप्रशान्तये ॥१४९॥

अन्ये च ये पठिष्यन्ति पाठयिष्यन्ति नित्यशः ।
तेषां दुःखं न स्वप्नेऽपि जायते नात्र संशयः ॥१५०॥

राज्ञां च संकटे प्राप्ते शतावर्तं चरेद्यदा ।
सांगं च विधियुक्तो हि कल्याणं लभते नरः ॥१५१॥

रोगनाशकरं ह्येतद्विद्यादायकमुत्तमम् ।
समुद्दिश्य फलं श्रेष्ठं पठन्ति फलमुत्तमम् ॥१५२॥

लभन्ते नाऽत्र संदेहः सत्यमेतद्व्रतं मम ।
प्रातः समुत्थाय सदा पूजां कृत्वा मदीयिकाम् ॥१५३॥

पठतो मत्समक्षं वै नित्यं सिद्धिर्न दूरतः ।
ऐहिकीं सिद्धिमासाद्य परलोकसमुद्भवाम् ॥१५४॥
प्राप्नोति पाठको नित्यमष्टमासान् सुरेश्वर ।
सायुज्यमुक्तिमायाति नाऽत्र कार्या विचारणा ॥१५५॥
एवमुक्त्वा तदा विष्णुं शंकरः प्रीतमानसः ।
उपस्पृश्य कराभ्यां च उवाच शंकरः पुनः ॥१५६॥
वरदोऽस्मि सुरश्रेष्ठ वरान्वर यथेप्सितान् ।
भक्त्या वशीकृतो नूनं स्तवेनानेन वै पुनः ॥१५७॥
इत्युक्तो देवदेवेन देवदेवं प्रणम्य तम् ।
यथेदानीं कृपा देव क्रियते चाऽप्यतः परम् ॥१५८॥
कार्या चैव विशेषेण कृपालुत्वात्त्वया प्रभो ।
त्वयि भक्ति महादेव प्रयच्छ वरमुत्तमम् ॥१५९॥
नाऽन्यमिच्छामि भगवन्पूर्णोऽहं ते प्रसादतः ।
तच्छ्रुत्वा वचनं तस्य दयावान्सुतरां भवः ॥१६०॥
प्राह त्वेनं महादेवः परमात्मानमच्युतम् ।
मयि भक्तिश्च वन्द्यस्त्वं पूज्यश्चैव सुरैरपि ॥१६१॥
विश्वंभरस्त्वदीयं वै नाम पापहरं परम् ।
भविष्यति न सन्देहो मत्प्रसादात्सुरोत्तम ॥१६२॥
इत्युक्त्वाऽन्तर्दधे रुद्रो भगवान्नीललोहितः ।
जनार्दनोऽपि भगवान्वचनाच्छंकरस्य च ॥१६३॥
प्राप्य चक्रं शुभं ध्यानं स्तोत्रमेतन्निरन्तरम् ।
पपाठाऽध्यापयामास भक्तेभ्यस्तदुपादिशत् ॥१६४॥
अन्येऽपि ये पठिष्यन्ति ते विन्दन्तु तथा फलम् ।
इति पृष्टं समाख्यातं शृण्वतां पापहारकम् ॥१६५॥
अतः परं च किं श्रेष्ठाः प्रष्टुमिच्छथ वै पुनः ॥१६६॥

इति श्रीशिवमहापुराणे ज्ञानसंहितायां शिवसहस्र-
नामकथनं नामैकसप्ततितमोऽध्यायः ॥



## श्रीगोपाल–सहस्रनामस्तोत्रम्

कस्तूरीतिलकं ललाटपटले वक्षःस्थले कौस्तुभं
नासाग्रे वरमौक्तिकं करतले वेणु करे कंकणम् ।
सर्वाङ्गे हरिचन्दनं सुललितं कण्ठे च मुक्तावलि-
गोंपस्त्रीपरिवेष्टितो विजयते गोपालचूड़ामणिः ॥ १ ॥
फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं
गोविन्दं कलवेणुवादनपरं दिव्यांगभूषं भजे ॥ २ ॥

ॐ क्लींदेवः कामदेवः कामबीजशिरोमणिः ।
श्रीगोपालो महीपालो वेदवेदान्तपारगः ॥१॥
कृष्णः कमलपत्राक्षः पुण्डरीकः सनातनः ।
गोपतिर्भूपतिः शास्ता प्रहर्ता विश्वतोमुखः ॥२॥
आदिकर्ता महाकर्ता महाकालः प्रतापवान् ।
जगज्जीवो जगद्धाता जगद्भर्ता जगद्वसुः ॥३॥
मत्स्यो भीमः कुहूभर्ता हर्ता वाराहमूर्तिमान् ।
नारायणो हृषीकेशो गोविन्दो गरुडध्वजः ॥४॥
गोकुन्द्रो महीचन्द्रः शर्वरीप्रियकारकः ।
कमला मुखलोलाक्षः पुण्डरीकः शुभावहः ॥५॥
दुर्वासः कपिलो भौमः सिन्धुसागरसङ्गमः ।
गोविन्दो गोपतिर्गोत्रः कालिन्दीप्रेमपूरकः ॥६॥
गोपस्वामी गोकुलेन्द्रो गोवर्धनवरप्रदः ।
नन्दादिगोकुलत्राता दाता दारिद्र्यभञ्जनः ॥७॥

सर्वमङ्गलदाता च सर्वकामप्रदायकः ।
आदिकर्ता महीभर्ता सर्वसागरसिन्धुजः ॥८॥
गजगामी गजोद्धारी कामी कामकलानिधिः ।
कलङ्करहितश्चन्द्रो बिम्बास्यो बिम्बसत्तमः ॥९॥
मालाकारः कृपाकारः कोकिलास्वरभूषणः ।
रामो नीलाम्बरो देवो हली दुर्दममर्दनः ॥१०॥
सहस्राक्षपुरीभेत्ता महामारीविनाशनः ।
शिवः शिवतमो भेत्ता बलारातिप्रपूजकः ॥११॥
कुमारीवरदायी च वरेण्यो मीनकेतनः ।
नरो नारायणो धीरो राधापतिरुदारधीः ॥१२॥
श्रीपतिः श्रीनिधिः श्रीमान्मापतिः प्रतिराजहा ।
वृन्दपतिः कुलग्रामी धामी ब्रह्म सनातनः ॥१३॥
रेवतीरमणो रामः प्रियश्चञ्चललोचनः ।
रामायण शरीरोऽयं रामी रामः श्रियः पतिः ॥१४॥
शर्वरः शर्वरी शर्वः सर्वत्र शुभदायकः ।
राधाराधयिताऽराधी राधाचित्तप्रमोदकः ॥१५॥
राधारतिसुखोपेतो राधामोहनतत्परः ।
राधावशीकरो राधाहृदयाम्भोजषट्पदः ॥१६॥
राधालिंगनसम्मोहो राधानर्तनकौतुकः ।
राधासंजातसंप्रीतो राधाकाम्यफलप्रदः ॥१७॥
वृन्दापतिः कोशनिधिः कोकशोकविनाशकः ।
चन्द्रापतिश्चन्द्रपतिश्चण्डको दण्डभञ्जनः ॥१८॥
रामो दाशरथी रामो भृगुवंशसमुद्भवः ।
आत्मारामो जितक्रोधो मोहो मोहान्धभञ्जनः ॥१९॥





वृषभानुर्भवो भावः काश्यपिः करुणानिधिः ।
कोलाहलो हलीहाली हेली हलधरप्रियः ॥२०॥
राधामुखाब्ज मार्तण्डो भास्करो रविजो विधुः ।
विधिर्विधाता वरुणो वारुणो वारुणीप्रियः ॥२१॥
रोहिणीहृदयानन्दो वसुदेवात्मजो बली ।
नीलाम्बरो रौहिणेयो जरासन्धवधोऽमलः ॥२२॥
नागो नवाम्भो विरदो विरहा वरदो बली ।
गोपथो विजयी विद्वान् शिपिविष्टः सनातनः ॥२३॥
परशुरामवचोग्राही वरग्राही शृगालहा ।
दमघोषोपदेष्टा च रथग्राही सुदर्शनः ॥२४॥
वीरपत्नीयशस्त्राता जराव्याधिविघातकः ।
द्वारकावासतत्त्वज्ञो हुताशनवरप्रदः ॥२५॥
यमुनावेगसंहारी नीलाम्बरधरः प्रभुः ।
विभुः शरासनो धन्वी गणेशो गणनायकः ॥२६॥
लक्ष्मणो लक्षणो लक्ष्यो रक्षोवंशविनाशनः ।
वामनो वामनीभूतो वामनो वामनारुहः ॥२७॥
यशोदानन्दनः कर्ता यमलार्जुनमुक्तिदः ।
उलूखली महामानी दामबद्धाह्वयी शमी ॥२८॥
भक्तानुकारी भगवान् केशवो बलधारकः ।
केशिहा मधुहा मोही वृषासुरविघातकः ॥२९॥
अघासुरविनाशी च पूतनामोक्षदायकः ।
कुब्जाविनोदी भगवान् कंशमृत्युर्महामखी ॥३०॥
अश्वमेधो वाजपेयो गोमेधो नरमेधवान् ।
कन्दर्पकोटिलावण्यश्चन्द्रकोटिसुशीतलः ॥३१॥

रविकोटिप्रतीकाशो वायुकोटिमहाबलः ।
ब्रह्मा ब्रह्माण्डकर्ता च कमलावाञ्छितप्रदः ॥३२॥

कमलाकमलाक्षश्च कमलामुखलोलुपः ।
कमलाव्रतधारी च कमलाभः पुरन्दरः ॥३३॥

सौभाग्याधिकचित्तोऽयं महामायी महोत्कटः ।
तारकारिः सुरत्राता मारीचक्षोभकारकः ॥३४॥

विश्वामित्र-प्रियो दान्तो रामो राजीवलोचनः ।
लङ्काधिपकुलध्वंसी विभीषणवरप्रदः ॥३५॥

सीतानन्दकरो रामो वीरो वारिधिबन्धनः ।
खरदूषणसंहारो साकेतपुरवासवान् ॥३६॥

चन्द्रावलीपतिः कूलः केशिकंसवधोऽमलः ।
माधवो मधुहा माध्वी माध्वीको माधवीविभुः ॥३७॥

मुञ्जाटवीगाहमानो धेनुकारिर्धरात्मजः ।
वंशीवटविहारी च गोवर्धनवनाश्रयः ॥३८॥

तथा तालवनोद्देशी भाण्डीरवनशंखहा ।
तृणावर्तकृपाकारी वृषभानुसुतापतिः ॥३९॥

राधाप्राणसमो राधावदनाब्जमधुव्रतः ।
गोपीरञ्जनदैवज्ञो लीलाकमलपूजितः ॥४०॥

क्रीड़ाकमलसन्दोहो गोपिकाप्रीतिरञ्जनः ।
रञ्जको रञ्जनो रंगो रंगी रंगमहीरुहः ॥४१॥

कामः कामारिभक्तोऽयं पुराणपुरुषः कविः ।
नारदो देवलो भीमो बालो बालमुखाम्बुजः ॥४२॥

अम्बुजो ब्रह्मसाक्षी च योगी दत्तवरो मुनिः ।
ऋषभः पर्वतो ग्रामो नदीपवनवल्लभः ॥४३॥





पद्मनाभः सुरज्येष्ठो ब्रह्मारुद्रोऽहिभूषितः ।
गणानां त्राणकर्ता च गणेशो ग्रहिलो ग्रही ॥४४॥

गणाश्रयो गणाध्यक्षः क्रोडीकृतजगत्त्रयः ।
यादवेन्द्रो द्वारकेन्द्रो मथुरावल्लभो धुरी ॥४५॥

भ्रमरः कुन्तलो कुन्तीसुतरक्षी महामखी ।
यमुनावरदाता च कश्यपस्य वरप्रदः ॥४६॥

शङ्खचूड़वधोद्दाम-गोपीरक्षणतत्परः ।
पाञ्चजन्यकरो रामी त्रिरामी वनजो जयः ॥४७॥

फाल्गुनः फाल्गुनसखो विराधवधकारकः ।
रुक्मिणीप्राणनाथश्च सत्यभामाप्रियङ्करः ॥४८॥

कल्पवृक्षो महावृक्षो दानवृक्षो महाफलः ।
अङ्कुशो भूसुरो भावो भ्रामको भामको हरिः ॥४९॥

सरलः शाश्वतो वीरो यदुवंशी शिवात्मकः ।
प्रद्युम्नो बलकर्ता च प्रहर्ता दैत्यहा प्रभुः ॥५०॥

महाधनो महावीरो वनमालाविभूषणः ।
तुलसीदामशोभाढ्यो जालन्धरविनाशनः ॥५१॥

शूरः सूर्यो मृताण्डश्च भास्करो विश्वपूजितः ।
रविस्तमोहा वह्निश्च वाड़वो वड़वानलः ॥५२॥

दैत्यदर्पविनाशी च गरुड़ो गरुड़ाग्रजः ।
गोपीनाथो महीनाथो वृन्दानाथो विरोधक ॥५३॥

प्रपञ्चो पञ्चरूपश्च लतागुल्मश्च गोपितः ।
गङ्गा च यमुनारूपो गोदा वेत्रवत्ती तथा ॥५४॥

कावेरी नर्मदा तापी गण्डकी सरयूस्तथा ।
राजसस्तामसः सत्त्वी सर्वाङ्गी सर्वलोचनः ॥५५॥

सुधामयोऽमृतमयो योगिनीवल्लभः शिवः ।
बुद्धो बुद्धिमतां श्रेष्ठो विष्णुजिष्णुः शचीपतिः ॥५६॥

वंशी वंशधरो लोको विलोको मोहनाशनः ।
रवरावो रवो रावो बलो बालो बलाहकः ॥५७॥

शिवो रुद्रो नलो नीलो लांगली लांगलाश्रयः ।
पारदः पावनो हंसो हंसारूढो जगत्पतिः ॥५८॥

मोहिनीमोहनो माया महामाया महासुखी ।
वृषावृषाकपिः कालः कालीदमनकारकः ॥५९॥

कुब्जाभाग्यप्रदो वीरो रजकक्षयकारकः ।
कोमलो वारुणो राजा जलजो जलधारकः ॥६०॥

हारकः सर्वपापघ्नः परमेष्ठी पितामहः ।
खड्गधारी कृपाकारी राधारमणसुन्दरः ॥६१॥

द्वादशारण्यसम्भोगी शेषनागफणालयः ।
कामः श्यामः सुखश्रीदः श्रीदः श्रीदपतिः कृती ॥६२॥

हरिर्नारायणो नारो नरोत्तम इषुप्रियः ।
गोपालीचित्तहर्ता च कर्ता संसारतारकः ॥६३॥

आदिदेवो महादेवो गौरीगुरुरनाश्रयः ।
साधुर्मधुर्विधुर्धाता भ्राताऽक्रूरपरायणः ॥६४॥

रोलम्बी च हयग्रीवो वानरारिर्वनाश्रयः ।
वनं वनी वनाध्यक्षो महावन्द्यो महामुनिः ॥६५॥

स्यामन्तकमणिप्राज्ञो विघ्नविघातकः ।
गोवर्धनो वर्धनीयो वर्धनी वर्धनप्रियः ॥६६॥

वर्धन्यो वधनो वर्धी वर्धिष्णुः सुमुखः प्रियः ।
वर्धितो वृद्धको वृद्धो वृन्दारकजनप्रियः ॥६७॥





गोपालरमणीभर्ता साम्बकुष्ठविनाशकः ।
रुक्मिणीहरणःप्रेमी चन्द्रावलीपतिः ॥६८॥

श्रीकर्ता विश्वभर्ता च नरो नारायणो बली ।
गणो गणपतिश्चैव दत्तात्रेयो महामुनिः ॥६९॥

व्यासो नारायणो दिव्यो भव्यो भावुकधारकः ।
श्वः श्रेयसं शिवं भद्रं भावुकं भाविकं शुभम् ॥७०॥

शुभात्मकः शुभः शास्ता प्रशस्तो मेघनादहा ।
ब्रह्मण्यदेवो दीनानामुद्धारकरणक्षमः ॥७१॥

कृष्णः कमलपत्राक्षः कृष्णः कमललोचनः ।
कृष्णः कामी सदा कृष्णः समस्तप्रियकारकः ॥७२॥

नन्दो नन्दी महानादी मादी मादनकः किली ।
मिली हिली गिलो गालो गोली गोलालयो गुली ॥७३॥

गुग्गुली मारकी शाखी वटः पिप्पलकः कृती ।
म्लेच्छहा कालकर्ता च यशोदायश एव च ॥७४॥

अच्युतः केशवो विष्णुर्हरिः सत्यो जनार्दनः ।
हंसो नारायणः नीलो लीलो भक्तिपरायणः ॥७५॥

जानकीवल्लभो रामो विरामो विघ्ननाशनः ।
सहभानुर्महाभानुर्वीरबाहुर्महोदधिः ॥७६॥

समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः ।
गोकुलानन्दकारी च प्रतिज्ञापरिपालकः ॥७७॥

सदारामः कृपारामो महारामो धनुर्धरः ।
पर्वतः पर्वताकारो गयो गेयो द्विजप्रियः ॥७८॥

कमलाश्वतरो रामो रामायणप्रवर्तकः ।
द्यौर्दिवो दिवसो दिव्यो भव्यो भावीभयापहः ॥७९॥

पार्वतीभाग्यसहितो भर्ता लक्ष्मीविलासवान् ।
विलासी साहसी सर्वी गर्वी गर्वितलोचनः ॥८०॥

मुरारिर्लोकधर्मज्ञो जीवनो जीवनान्तकः ।
यमो यमादियमनो यामो यामविधातकः ॥८१॥

वंसुली पांसुली पांसुः पाण्डुरर्जुनवल्लभः ।
ललिता-चन्द्रिका-माली मालाम्बुजाश्रयः ॥८२॥

अम्बुजाक्षो महायज्ञो दक्षश्चिन्तामणिः प्रभुः ।
मणिर्दिनमणिश्चैव केदारो बदरी श्रयः ॥८३॥

बदरीवनसंप्रीतो व्यासः सत्यवतीसुतः ।
अमरारिनिहन्ता च सुधासिन्धुविधूदयः ॥८४॥

चन्द्रो रविः शिवः शूली चक्री चैव गदाधरः ।
श्रीकर्त्ता श्रीपतिः श्रीदः श्रीदेवो देवकीसुतः ॥८५॥

पुण्डरीकाक्षः पद्मश्च पद्मनाभो जगत्पतिः ।
वासुदेवो प्रमेयात्मा केशवो गरुड़ध्वजः ॥८६॥

नारायणः परंधाम देवदेवो महेश्वरः ।
चक्रपाणिः कलापूर्णो वेदवेद्यो दयानिधिः ॥८७॥

भगवान् सर्वभूतेशो गोपालः सर्वपालकः ।
अनन्तो निर्गुणो नित्यो निर्विकल्पो निरञ्जनः ॥८८॥

निराधारो निराकारो निराभासो निराश्रयः ।
पुरुषः प्रणवातीतो मुकुन्दः परमेश्वरः ॥८९॥

क्षणावनिः सार्वभौमो वैकुण्ठो भक्तवत्सलः ।
विष्णुर्दामोदरः कृष्णो माधवो मथुरापतिः ॥९०॥

देवकीगर्भसंभूतो यशोदावत्सलो हरिः ।
शिवः संकर्षणः शंभुर्भूतनाथो दिवस्पतिः ॥९१॥





अव्ययः सर्वधर्मज्ञो निर्मलो निरुपद्रवः ।
निर्वाणनायको नित्यो नीलजीमूतसन्निभः ॥ ९२ ॥

कलाक्षयश्च सर्वज्ञः कमलारूपतत्परः ।
हृषीकेशः पीतवासा वसुदेवप्रियात्मज ॥ ९३ ॥

नन्दगोपकुमारार्यो नवनीताशनो विभुः ।
पुराणपुरुषः श्रेष्ठः शङ्खपाणिः सुविक्रमः ॥ ९४ ॥

अनिरुद्धश्चक्ररथः शार्ङ्गपाणिश्चतुर्भुजः ।
गदाधरः सुरार्तिघ्नो गोविन्दो नन्दकायुधः ॥ ९५ ॥

वृन्दवनचरः शौरिर्वेणुवाद्यविशारदः ।
तृणावर्तान्तको भीमसाहसो बहुविक्रमः ॥ ९६ ॥

शकटासुरसंहारी बकासुरविनाशनः ।
धेनुकासुरसंहारी पूतनारिर्नृकेशरी ॥ ९७ ॥

पितामहो गुरुः साक्षी प्रत्यगात्मा सदाशिवः ।
अप्रमेयः प्रभुः प्राज्ञोऽप्रतर्क्यः स्वप्नवर्द्धनः ॥ ९८ ॥

धन्यो मान्यो भवो भावो धीरः शान्तो जगद्गुरुः ।
अन्तर्यामीश्वरो दिव्यो दैवज्ञो देवसंस्तुतः ॥ ९९ ॥

क्षीराब्धिशयनो धाता लक्ष्मीवाँल्लक्ष्मणाग्रजः ।
धात्रीपतिरमेयात्मा चन्द्रशेखरपूजितः ॥ १०० ॥

लोकसाक्षी जगच्चक्षुः पुण्यचारित्रकीर्तनः ।
कोटिमन्मथसौन्दर्यो जगन्मोहनविग्रहः ॥ १०१ ॥

मन्दस्मिताननो गोपो गोपिकापरिवेष्टितः ।
फुल्लारविन्दनयनश्चाणूरान्ध्रनिषूदनः ॥ १०२ ॥

इन्दीवरदलश्यामो बर्हिबर्हावतंसकः ।
मुरलीनिनदाह्लादो दिव्यमाल्याम्बरावृतः ॥ १०३ ॥

सुकपोलयुगः सुभ्रूयुगलः सुललाटकः ।
कम्बुग्रीवो विशालाक्षो लक्ष्मीवांश्छुभलक्षणः ॥ १०४ ॥
पीनवक्षाश्चतुर्बाहुश्चतुर्मूर्तिस्त्रिविक्रमः ।
कलङ्करहितः शुद्धो दुष्टशत्रुनिवर्हणः ॥ १०५ ॥
किरीटकुण्डलधरः कटकांगदमण्डितः ।
मुद्रिकाभरणोपेतः कटिसूत्रविराजितः ॥ १०६ ॥
मंजीररंजितपदः सर्वाभरणभूषितः ।
विन्यस्तपादयुगलो दिव्यमंगलविग्रह ः १०७ ॥
गोपिकानयनानन्दः पूर्णचन्द्रनिभाननः ।
समस्तजगदानन्दः सुन्दरो लोकनन्दनः ॥ १०८ ॥
यमुनातीरसञ्चारी राधामन्मथवैभवः ।
गोपनारीप्रियो दान्तो गोपीवस्त्रापहारकः ॥ १०९ ॥
शृंगारमूर्तिः श्रीधामा तारको मूलकारणम् ।
सृष्टिसंरक्षणोपायः क्रूरासुरविभञ्जनः ॥ ११० ॥
नरकासुरसंहारी मुरारिर्वैरिमर्दनः ।
आदितेयप्रियो दैत्यभीकरो यदुशेखरः ॥ १११ ॥
जरासन्धकुलध्वंसी कंसारातिः सुविक्रमः ।
पुण्यश्लोकः कीर्तनीयो यादवेन्द्रो जगन्नुतः ॥ ११२ ॥
रुक्मिणीरमणो रामः भामाजाम्बवतीप्रियः ।
मित्रविन्दानाग्नजितो लक्ष्मणसमुपासितः ॥ ११३ ॥
सुधाकरकुले जातो नन्तप्रबलविक्रमः ।
सर्वसौभाग्यसम्पन्नो द्वारकापत्तने स्थितः ॥ ११४ ॥
भद्रासूर्यसुतानाथो लीलामानुषविग्रहः ।
सहस्रषोडशस्त्रीशो भोगमोक्षैकदायकः ।
वेदान्तवेद्यः संवेद्यो वेद्यो ब्रह्माण्डनायकः ॥ ११५ ॥





गोवर्धनधरो नाथः सर्वजीवदयापरः ।
मूर्तिमान् सर्वभूतात्मा आर्तत्राणपरायणः ॥ ११६ ॥
सर्वज्ञः सर्वसुलभः सर्वशास्त्रविशारदः ।
षड्गुणैश्वर्यसम्पन्नः पूर्णकामो धुरन्धरः ॥ ११७ ॥
महानुभावः कैवल्यदायको लोकनायकः ।
आदिमध्यान्तरहितः शुद्धसात्त्विकविग्रह ॥ ११८ ॥
असमानः समस्तात्म शरणागतवत्सलः ।
उत्पत्तिस्थितिसंहारकारणं सर्वकारकणम् ॥ ११९ ॥
गम्भीरः सर्वभावज्ञः सच्चिदानन्दविग्रहः ।
विष्वक्सेनः सत्यसन्धः सत्यवाक् सत्यविक्रमः ॥ १२० ॥
सत्यव्रतः सत्यरतः सत्यधर्मपरायणः ।
आपन्नार्तिप्रशमनो द्रौपदीमानरक्षकः ॥ १२१ ॥
कन्दर्पजनकः प्राज्ञो जगन्नाटकवैभवः ।
भक्तिवश्यो गुणातीतः सर्वैश्वर्यप्रदायकः ॥ १२२ ॥
दमघोषसुतद्वेषी बाणबाहुविखण्डनः ।
भीष्मभक्तिप्रदो दिव्यः कौरवान्वयनाशनः : ॥ १२३ ॥
कौन्तेयप्रियबन्धुश्च पार्थस्यन्दनसारथि ः ।
नरसिंहो महावीरः स्तम्भजातो महाबलः ॥ १२४ ॥
प्रह्लादवरदः सत्यो देवपूज्यो भयंकरः ।
उपेन्द्रइन्द्रावरजो वामनो बालबन्धनः ॥ १२५ ॥
गजेन्द्रवरदः स्वामी सर्वदेवनमस्कृतः ।
शेषपर्यङ्कशयनो वैनतेयरथो जयी ॥ १२६ ॥
अव्याहतबलैश्वर्यसम्पन्नः पूर्णमानसः ।
योगेश्वरेश्वरः साक्षी क्षेत्रज्ञो ज्ञानदायकः ॥ १२७ ॥

योगिहृत्पङ्कजावासो योगमायासमन्वितः ।
नादबिन्दुकलातीतश्चतुर्वर्गफलप्रदः ॥ १२८ ॥
सुषुम्नामार्गसञ्चारी देहस्यान्तर संस्थितः ।
देहेन्द्रियमनःप्राणसाक्षी चेतः प्रसादकः ॥ १२९ ॥
सूक्ष्मः सर्वगतो देही ज्ञानदर्पणगोचरः ।
तत्त्वत्रयात्मको व्यक्तः कुण्डलीसमुपाश्रितः ॥ १३० ॥
ब्रह्मण्यः सर्वधर्मज्ञः शान्तो दान्तो गतक्लमः ।
श्रीनिवासः सदानन्दो विश्वमूर्तिर्महाप्रभुः ॥ १३१ ॥
सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् ।
समस्तभुवनाधारः समस्तप्राणरक्षकः ॥ १३२ ॥
समस्तसर्वभावज्ञो गोपिकाप्राणवल्लभः ।
नित्योत्सवो नित्यसौख्यो नित्यश्रीर्नित्यमंगलः ॥ १३३ ॥
व्यूहार्चितो जगन्नाथः श्रीवैकुण्ठपुराधिपः ।
पूर्णानन्दघनीभूतो गोपवेषधरो हरिः ॥ १३४ ॥
कलापकुसुमश्यामः कोमलः शान्तिविग्रहः ।
गोपाङ्गनावृतोऽनन्तो वृन्दावनसमाश्रयः ॥ १३५ ॥
वेणुवादरतः श्रेष्ठो देवानां हितकारकः ।
बालक्रीडासमासक्तो नवनीतस्य तस्करः ॥ १३६ ॥
गोपालकामिनीजारश्चौरराजशिखामणिः ।
परंज्योतिः पराकाशः परावासः परिस्फुटः ॥ १३७ ॥
अष्टादशाक्षरो मन्त्रो व्यापको लोकपावनः ।
सप्तकोटिमहामन्त्रशेखरो देवशेखरः ॥ १३८ ॥
विज्ञानं ज्ञानसन्धानस्तेजोराशिर्जगत्पतिः ।
भक्तलोकप्रसन्नात्मा भक्तमन्दारविग्रहः ॥ १३९ ॥





भक्तदारिद्र्यदमनो भक्तानां प्रीतिदायकः ।
भक्ताधीनमनाः पूज्यो भक्तलोकशिवंकरः ॥१४०॥
भक्ताभीष्टप्रदः सर्वभक्ताघौघनिकृन्तनः ।
अपारकरुणासिन्धुर्भगवान् भक्ततत्परः ॥१४१॥

## ❀ अथ फलश्रुतिः ❀

इति श्रीराधिकानाथसहस्रं नामकीर्तनम् ।
स्मरणात्पापराशीनां खण्डनं मृत्युनाशनम् ॥१॥
वैष्णवानां प्रियकरं महारोगनिवारणम् ।
ब्रह्महत्यासुरापानं परस्त्रीगमनं तथा ॥२॥
परद्रव्यापहरणं परद्वेषसमन्वितम् ।
मानसं वाचिकं कायं यत्पापं पापसम्भवम् ॥३॥
सहस्रनामपठनात्सर्वं नश्यति तत्क्षणात् ।
महादारिद्र्ययुक्तो यो वैष्णवो विष्णुभक्तिमान् ॥४॥
कार्तिक्यां सम्पठेद्रात्रौ शतमष्टोत्तरं क्रमात् ।
पीताम्बरधरो धीमान् सुगन्धैः पुष्पचन्दनैः ॥५॥
पुस्तकं पूजयित्वा तु नैवेद्यादिभिरेव च ।
राधाध्यानांकितो धीरो वनमालाविभूषितः ॥६॥
शतमष्टोत्तरं देवि पठेन्नामसहस्रकम् ।
चैत्रशुक्ले च कृष्णे च कुहूसंक्रान्तिवासरे ॥७॥
पठितव्यं प्रयत्नेन त्रैलोक्यं मोहयेत्क्षणात् ।
तुलसीमालया युक्तो वैष्णवो भक्तितत्परः ॥८॥
रविवारे च शुक्रे च द्वादश्यां श्राद्धवासरे ।
ब्राह्मणं पूजयित्वा च भोजयित्वा विधानतः ॥९॥

पठेन्नामसहस्रं च ततः सिद्धिः प्रजायते ।
महानिशायां सततं वैष्णवो यः पठेत्सदा ॥१०॥

देशान्तरगता लक्ष्मीः समायाति न संशयः ।
त्रैलोक्ये च महादेवि सुन्दर्यः काममोहिताः ॥११॥

मुग्धाः स्वयं समायान्ति वैष्णवं च भजन्ति ताः ।
रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बन्धनात् ॥१२॥

गर्भिणी जनयेत्पुत्रं कन्या विन्दति सत्पतिम् ।
राजानो वश्यतां यान्ति किं पुनः क्षुद्रमानवाः ॥१३॥

सहस्रनामश्रवणात्पठनात्पूजनात्प्रिये ।
धारणात्सर्वमाप्नोति वैष्णवो नात्र संशयः ॥१४॥

वंशीवटे चान्यवटे तथा पिप्पलकेऽथवा ।
कदम्बपादपतले गोपालमूर्तिसन्निधौ ॥१५॥

यः पठेद्वैष्णवो नित्यं स याति हरिमन्दिरम् ।
कृष्णेनोक्तं राधिकायै मया प्रोक्तं तथा शिवे ॥१६॥

नारदाय पुरा प्रोक्तं नारदेन प्रकाशितम् ।
मया तुभ्यं वरारोहे प्रोक्तमेतत्सुदुर्लभम् ॥१७॥

गोपनीयं प्रयत्नेन न प्रकाश्यं कथञ्चन ।
शठाय पापिने चैव लम्पटाय विशेषतः ॥१८॥

न दातव्यं न दातव्यं न दातव्यं कदाचन ।
देयं शिष्याय शान्ताय विष्णुभक्तिरताय च ॥१९॥

गोदानब्रह्मयज्ञादेर्वाजपेयशतस्य च ।
अश्वमेधसहस्रस्य फलं पाठे भवेद् ध्रुवम् ॥२०॥

मोहनं स्तंभनं चैव मरिणोच्चाटनादिकम् ।
यद्यद्वांछति चित्तेन तत्तत्प्राप्नोति वैष्णवः ॥२१॥





एकादश्यां नरः स्नात्वा सुगन्धिद्रव्यतैलकैः ।
आहारं ब्राह्मणे दत्त्वा दक्षिणां स्वर्णभूषणम् ॥२२॥

तत आरम्भकर्त्तास्य सर्वं प्राप्नोति मानवः ।
शतावृत्तं सहस्रं च यः पठेद्वैष्णवो जनः ॥२३॥

श्रीवृन्दावनचन्द्रस्य प्रसादात्सर्वमाप्नुयात् ।
यद्गृहे पुस्तकं देवि पूजितं चैव तिष्ठति ॥२४॥

न मारी न च दुर्भिक्षं नोपसर्गभयं क्वचित् ।
सर्पाद्या भूत-यक्षाद्या नश्यन्ते नात्र संशयः ॥२५॥

श्रीगोपालो महादेवि वसेत्तस्य गृहे सदा ।
गृहे यत्र सहस्रं च नाम्नां तिष्ठति पूजितम् ॥२६॥

ॐतत्सदिति श्रीसम्मोहनतन्त्रे पार्वतीश्वरसंवादे

श्रीगोपाल-सहस्रनामस्तोत्रं सम्पूर्णम् ।

# श्रीसूर्य-सहस्रनामस्तोत्रम्

सुमन्तुरुवाच

माघे मासि सिते पक्षे सप्तम्यां कुरुनन्दन ।

निराहारो रविं भक्त्या पूजयेद् विधिना नृप ॥१॥

पूर्वोक्तेन जपेज्जप्यं देवस्य पुरतः स्थितः ।

शुद्धैकाग्रमना राजन् जितक्रोधो जितेन्द्रियः ॥२॥

शतानिक उवाच

केन मन्त्रेण जप्तेन दर्शनं भगवान् व्रजेत् ।

स्तोत्रेण वापि सविता तन्मे कथय सुव्रत ॥३॥

सुमन्तुरुवाच

स्तुतो नामसहस्रेण यदा भक्तिमता मया ।

तदा मे दर्शनं यातः साक्षाद्देवो दिवाकरः ॥४॥

शतानीक उवाच

नाम्नां सहस्रं सवितुः श्रोतुमिच्छामि हे द्विज ।

येन ते दर्शनं यातः साक्षाद्देवो दिवाकरः ॥५॥

सुमन्तुरुवाच

सर्वमंगलमागल्यं सर्व पापप्रणाशनम् ।

स्तोत्रमेतन्महापुण्यं सर्वोपद्रवनाशनम् ॥६॥

न यदस्ति भयं किंचित् यदनेन न नश्यति ।

ज्वराद्यैर्मुच्यते राजन् स्तोत्रेऽस्मिन् पठिते नरः ॥७॥





अन्ये च रोगाः शाम्यन्ति पठतः शृण्वतस्तथा ।
सम्पद्यन्ते यथाकामाः सर्वं एव यथेप्सिताः ॥८॥

य एतदादितः श्रुत्वा संग्रामं प्रविशेन्नरः ।
स जित्वा समरे शत्रूनभ्येति गृहमक्षतः ॥९॥

वन्ध्यानां पुत्रजननं भीतानां भयनाशनम् ।
भूतिकारि दरिद्राणां कुष्ठिनां परमौषधम् ॥१०॥

बालानां चैव सर्वेषां ग्रहरक्षोनिवारणम् ।
पठेदेतद्धि यो राजन् स श्रेयः परमाप्नुयात् ॥११॥

स सिद्धः सर्वसंकल्पः सुखमत्यन्तमश्नुते ।
धर्मार्थिभिर्धर्मलुब्धैः सुखाय च सुखार्थिभिः ॥१२॥

राज्याय राज्यकामैश्च पठितव्यमिदं नरैः ।
विद्यावहन्तु विप्राणां क्षत्रियाणां जयावहम् ॥१३॥

पश्वावहन्तु वैश्यानां शूद्राणां धर्मवर्धनम् ।
पठतां शृण्वतामेतद् भवतीति न संशयः ॥१४॥

तच्छृणुष्व नृपश्रेष्ठ प्रयतात्मा ब्रवीमि ते ।
नाम्नां सहस्रं विख्यातं देवदेवस्य भास्वतः ॥१५॥

अस्य श्रीसूर्यसहस्रनामस्तोत्रस्य वेदव्यासऋषिरनुष्टुप्छन्दः सविता देवता अभीष्टसिद्ध्यर्थंजपे विनियोगः ।

ओं विश्वविद् विश्वजित् कर्ता विश्वात्मा विश्वतोमुखः ।
विश्वेश्वरो विश्वयोनिः नियतमात्मा जितेन्द्रियः ॥१६॥

कालाश्रयः कालकर्ता कालहा कालनाशनः ।
महायोगी महाबुद्धिर्महात्मा सुमहाबलः ॥१७॥

प्रभुर्विभुर्भूतनाथो भूतात्मा भुवनेश्वरः ।
भूतभव्यो भावितात्मा भूतान्तःकरणः शिवः ॥१८॥

शरण्यः कमलानन्दो नन्दनो नन्दिवर्धनः ।
वरण्यो वरदो योगी सुसंयुक्तः प्रकाशनः ॥१९॥

प्राप्तयानः परप्राणः पूतात्मा प्रयतः प्रियः ।
नयः सहस्रपात्साधुर्दिव्यकुण्डलमण्डितः ॥२०॥

अव्यंगधारी धीरात्मा सविता वायुवाहनः ।
समाहितमतिर्दाता विधाता कृतमंगलः ॥२१॥

कपर्दी कल्पपाद्रुमः सुमना धर्मवत्सलः ।
समायुक्तो विमुक्तात्मा कृतात्मा कृतिनां वरः ॥२२॥

अविचिन्त्यवपुः श्रेष्ठो महायोगी महेश्वरः ।
कान्तः कामारिरादित्यः नियतात्मा निराकुलः ॥२३॥

कामः कारुणिकः कर्ता कमलाकरबोधनः ।
सप्तसप्तिरचिन्त्यात्मा महाकारुणिकोत्तमः ॥२४॥

संजीवनो जीवनाथो जयो जीवो जगत्पतिः ।
अयुक्तो विश्वनिलयः संविभागी वृषध्वजः ॥२५॥

वृषाकपिः कल्पकर्ता कल्पान्तकरणो रविः ।
एकचक्ररथो मौनी सुरथो रथिनां वरः ॥२६॥

संक्रोधनो रश्मिमाली तेजोराशिर्विभावसुः ।
दिवाकृद् दिनकृद् देवा देवदेवो दिवस्पतिः ।।२७॥

दीननाथो हरो होता दिवाबाहुर्दिवाकरः ।
यज्ञो यज्ञपतिः पूषा स्वर्णरेताः परावरः ॥२८॥

परापरज्ञस्तरुणरंशुमाली मनोहरः ।
प्राज्ञः प्राज्ञपतिः सूर्यः सविता विष्णुरंशुमान् ॥२९॥

सदागतिर्गन्धवहो विहितो विधिराशुगः ।
पतंगः पतगः स्थाणुर्विहंगो विहगा वरः ॥३०॥





हर्यश्वो हरिताश्वश्च हरिदश्वो जगत्प्रियः ।
त्र्यम्बकः सर्वदमनो भावितात्मा भिषग्वरः ॥ ३१ ॥

आलोकस्त्रैलोक्यनाथो लोकालोकनमस्कृतः ।
कालः कल्पान्तको वह्निस्तपनः संप्रतापनः ॥ ३२ ॥

विलोचनो विरूपाक्षः सहस्राक्षः पुरन्दरः ।
सहस्ररश्मिर्मिहिरो विविधाम्बरभूषणः ॥ ३३ ॥

खगः प्रतर्दनो धन्यो हयगो वाग्विशारदः ।
श्रीमांश्च शिशिरो वाग्मी श्रीपतिः श्रीनिकेतनः ॥ ३४ ॥

श्रीकण्ठः श्रीधरः श्रीमान् श्रीनिवासो वसुप्रदः ।
कामचारी महामायो महोक्षा विदितामयः ॥ ३५ ॥

तीर्थक्रियावान् सुनयो विभक्तो भक्तवत्सलः ।
कीर्तिः कीर्तिकरो नित्यः कुण्डली कवची रथी ॥ ३६ ॥

हिरण्यरेताः सप्ताश्वः प्रयतात्मा परन्तपः ।
बुद्धिमानमरश्रेष्ठो रोचिष्णुः पाकशासनः ॥३७॥

समुद्रो धनदो धाता मान्धाता कश्मलापहः ।
तमोघ्नो ध्वान्तहा वह्निर्होतान्तःकरणो गुहः ॥३८॥

पशुमान् प्रयतानान्दो भूतेशः श्रीमतां वरः ।
नित्योदितो नित्यरथः सुरेश सुरपूजितः ॥३९॥

अजितो विजयो जेता जंगमः स्थावरात्मकः ।
जीवानन्दो नित्यगामी विजेता विजयप्रदः ॥४०॥

पर्जन्योऽग्निस्थितिः श्रेयान् स्थविरोऽथ निरंजनः ।
प्रद्योतनो रथारूढः सर्वलोकप्रकाशकः ॥४१॥

ध्रुवो मेधी महावीर्यो हंसः संसारतारकः ।
सृष्टिकर्ता क्रियाहेतुर्मार्तण्डो मरुतां पतिः ॥४२॥

मरुत्वान् दहनस्त्वष्टा भागो भाग्योऽर्यमा कपिः ।
वरुणेशो जगन्नाथः कृतकृत्यः सुलोचनः ॥४३॥

विवस्वान् भानुमान् कार्यः कारणस्तेजसां निधिः ।
असंगगामी तिग्मांशुर्घर्मांशुर्दीप्तदीधितिः ॥४४॥

सहस्रदीधितिर्ब्रध्नः सहस्रांशुर्दिवाकरः ।
गभस्तिमान् दीधितिमान् स्रग्वी मणिकुलद्युतिः ॥४५॥

भास्करः सुरकार्यज्ञः सर्वज्ञस्तीक्ष्णदीधितिः ।
सुरज्येष्ठः सुरपतिर्बहुज्ञो वचसाम्पतिः ॥४६॥

तेजोनिधिर्बृहत्तेजा बृहत्कीर्तिर्बृहस्पतिः ।
अहिमानूर्जितो धीमानामुक्तः कीर्तिवर्धनः ॥४७॥

महावैद्यो गणपतिर्धनेशो गणनायकः ।
तीव्रप्रतापनस्तापी तापनो विश्वतापनः ॥४८॥

कार्तस्वरो हृषीकेशः पद्मानन्दोऽतिनन्दितः ।
पद्मनाभोऽमृताहारः स्थितिमान् केतुमान् नभः ॥४९॥

अनाद्यन्तोऽच्युतो विश्वो विश्वामित्रो घृणिर्विराट् ।
आमुक्तः कवची वाग्मी कञ्चुकी विश्वभावनः ॥५०॥

अनिमित्तगतिः श्रेष्ठः शरण्यः सर्वतोमुखः
विगाही वेनवसहः समायुक्तः समाक्रतुः ॥५१॥

धर्मकेतुः धर्मरतिः संहर्त्ता संयमो यमः ।
प्रणतार्तिहरो मायुः सिद्धकार्यो जनेश्वरः ॥५२॥

नभो विगाहनः सत्यः सवितात्मा मनोहरः ।
हारी हरिर्हरो वायुर्ऋतुकालीनसंद्युतिः ॥५३॥

सुखसेव्यो महातेजा जगतामन्यकारणम् ।
महेन्द्रो विष्टुतः स्तोत्रं स्तुतिहेतुः प्रभाकरः ॥५४॥





सहस्रकरः आयुष्मान् रोगदः सुखदः सुखी ।
व्याधिहा सुखदः सौख्यं कल्याणः कल्यतां वरः ॥५५॥

आरोग्यकारणं सिद्धिर्ऋद्धिर्वृद्धिर्बृहस्पतिः ।
हिरण्यरेता आरोग्यो विद्वान् ब्रध्नो बुधो महान् ॥५६॥

प्राणवान् धृतिमान् घर्मो धर्मकर्त्ता रुचिप्रदः ।
सर्वप्रियः सर्वसहः सर्वशत्रुविनाशनः ॥५७॥
प्रांशुर्विद्योतनो द्योतः सहस्रकिरणः कृतिः ।
केयूरी भूषणोद्भासी भासितो भासितोऽनलः ॥५८॥

शरण्यार्तिहरो होता खद्योतः खगसत्तमः ।
सर्वद्योतो भवद्योतः सर्वद्युतिकरो मतः ॥५९॥

कल्याणः कल्याणकरः कल्पः कल्पकरः कविः ।
कल्याणकृत् कल्पवपुः सर्वकल्याणभाजनः ॥६०॥

शान्तिप्रियः प्रसन्नात्मा प्रशान्तः प्रशमः प्रियः ।
उदारकर्मा सुनयः सुवर्चो वर्चसोऽनलः ॥६१॥

वर्चसी वर्चसामीशस्त्रैलोक्येशो वशानुगः ।
तेजस्वी सुयशा वर्मी वर्णाध्यक्षो बलिप्रियः ॥६२॥

यशस्वी तेजोनिलयस्तेजस्वी प्रकृतिस्थितः ।
आकाशगः शीघ्रगतिराशुगो गतिमान् खगः ॥६३॥

गोपतिर्ग्रहदक्षेशो गोमानेकः प्रभंजनः ।
जनिता प्रजनं जीवो दीपः सर्वप्रकाशकः ॥६४॥

सर्वसाक्षी योगनित्यो नभस्वानसुरान्तकः ।
रक्षघ्नो विघ्नशमनः किरीटी प्रशमः प्रियः ॥६५॥

मरीचिमाली सुमतिः कृताभिख्याविशेषकः ।
शिष्टाचारः शुभाचारः साचाराचारतत्परः ॥६६॥

मन्दारो माठरो वेणुः क्षुधापः क्षापितो गुरुः ।
सुविशिष्टो विशिष्टात्मा विधेयो ज्ञानशोभनः ॥६७॥

महाश्वेतः प्रियो ज्ञेयः सामगो मोक्षदायकः ।
सर्ववेदप्रगीतात्मा सर्ववेदालयो लयः ॥६८॥

वेदमूर्तिश्चतुर्वेदो वेदभृद् वेदपारगः ।
क्रियावानसितो जिष्णुर्वरीयांशुर्वरप्रदः ॥६९॥

व्रतचारी व्रतधरो लोकबन्धुरलंकृतः ।
अलंकारोऽक्षरो वेद्यो विद्यावान् विदिताशयः ॥७०॥

आकारो भूषणो भूष्यो विष्णुर्भुवनपूजितः ।
चक्रपाणिर्ध्वजधरः सुरेशो लोकवत्सलः ॥७१॥

वाग्मिपतिर्महाबाहुः प्रकृतिर्विकृतिर्गुणः ।
अन्धकारापहः श्रेष्ठो युगावर्तो युगादिकृत् ॥७२॥

अप्रमेयः सदायोगी निरहंकार ईश्वरः ।
शुभप्रदः शुभः शोभा शुभकर्मा शुभप्रदः ॥७३॥

सत्यवान् श्रुतिमानुच्चैर्नकारो वृद्धिदोऽनलः ।
बलभृद् बलदो बन्धुर्मतिमान् बलिनां वरः ॥७४॥

अनंगो नागराजेन्द्रः पद्मयोनिर्गणेश्वरः ।
सम्वत्सर ऋतुर्नेता कालचक्रप्रवर्तकः ॥७५॥

पद्मेक्षणः पद्मयोनिः प्रभावानमरः प्रभुः ।
सुमूर्तिः सुमतिः सोमो गोविन्दो जगदादिजः ॥७६॥

पीतवासाः कृष्णवासा दिग्वासातीन्द्रियो हरिः ।
अतीन्द्रियोऽनेकरूपः स्कन्दः पुरपुरन्दरः ॥७७॥

शक्तिमान् जलधृग् भास्वान् मोक्षहेतुरजो निजः ।
सर्वदर्शी जितादर्शो दुःस्वप्नाशुभनाशनः ॥७८॥





मांगल्यकर्ता तरुणिर्वेगवान् कश्मलापहः ।
स्पष्टाक्षरो महामन्त्रो विशाखो यजनप्रियः ॥७९॥

विश्वकर्मा महाशक्तिर्ज्योतिरीशो विहङ्गमः ।
विचक्षणो दक्ष इन्द्रः प्रत्यूषः प्रियदर्शनः ॥८०॥

अखिन्नो वेदनिलयो वेदविद् विदिताश्रयः ।
प्रभाकरो जितरिपुः सुजनोऽरुणसारथिः ॥८१॥

कुनरः सुरतः स्कन्दो मोहितोऽभिमतो गुरुः ।
ग्रहराजो ग्रहपतिर्ग्रहनक्षत्रमण्डलः ॥८२॥

भास्करस्तपनः स्यन्दो नन्दनो नरवाहनः ।
माङ्गल्योऽथ मङ्गलवान् मङ्गल्यो मङ्गलापहः ॥८३॥

माङ्गल्ये चारुचरितं शीर्णः सर्वव्रतो व्रती ।
चतुर्मुखः पद्ममाली पूतात्मा प्रणतार्तिहा ॥८४॥

अकिञ्चनः सत्यसन्ध्यो निर्गुणो गुणवान् शुचिः ।
सम्पूर्णः पुण्डरीकाक्षो विधेयो योगतत्परः ॥८५॥

सहस्रांशुः क्रतुपतिः सर्वज्ञः सुमतिः सुवाक् ।
सुवाहनो माल्यदामा कृताहारो हरिप्रियः ॥८६॥

ब्रह्मा प्रचेताः प्रथितः प्रयतात्मा स्थिरात्मकः ।
शतबिन्दुः शतमुखो गरीयाननलप्रभः ॥८७॥

धीरो महत्तरो विप्रः पुराणपुरुषोत्तमः ।
विद्याराजाधिराजो हि विद्यावान् भूतिदः स्थितः ॥८८॥

अनिर्देश्यवपुः श्रीमान् विपाप्मा बहुमङ्गलः ।
स्वस्तिदः सुरथः स्वर्णो मोक्षदो बलिकेतनः ॥८९॥

निर्द्वन्द्वो द्वन्द्वहा स्वर्गः सर्वगः संप्रकाशकः ।
दयालुः सूक्ष्मधीः क्षान्तिः क्षेमाक्षेमस्थितिप्रियः ॥९०

भूधरो भूपतिर्वक्ता पवित्रात्मा त्रिलोचनः ।
महावराहः प्रियकृद्दाता भोक्ताऽभयप्रदः ॥९१॥

चक्रवर्ती धृतिकरः सम्पूर्णोऽथ महेश्वरः ।
चतुर्वेदधरोऽचिन्त्यो विनिद्रो विविधाशनः ॥९२॥

विचित्ररथ एकाकी सप्तशक्तिः परावरः ।
सर्वोदधिस्थितिकरः स्थितिस्थेयः स्थितिप्रियः ॥९३॥

निष्कलः पुष्कलविभुर्वसुमान् वासवप्रियः ।
वसुमान् वासवस्वामी वसुधाता वसुप्रदः ॥९४॥

बलवान् ज्ञानवांस्तत्त्वमोङ्कारस्त्रिषु संस्थितः ।
सङ्कल्पयोनिर्दिनकृद् भगवान् कारणात्परः ॥९५॥

नीलकण्ठो धनाध्यक्षश्चतुर्वेदप्रियम्वदः ।
वषट्कारोद्गतो होता स्वाहाकारो हुताहुतिः ॥९६॥

जनार्दनो जनानन्दो नरो नारायणोऽम्बुदः ।
सन्देहक्षपणो वायुः सदा सुरनमस्कृतः ॥९७॥

विग्रही विमलो बिन्दुर्विशोको विमलद्युतिः ।
द्युतितो द्योतनो विद्युत् विद्यावान् विदितो बलिः ॥९८॥

घर्मदो हिमदो हासः कृष्णवर्त्मा सुभाजितः ।
सावित्रीभावितो राजा विश्वामित्रो घृणिर्विराट् ॥९९॥

सप्तार्चिः सप्ततुरगः सप्तलोकनमस्कृतः ।
सम्पन्नोऽथ जगन्नाथः सुमनः शोभनः प्रियः ॥१००॥

सर्वात्मा सर्वकृत्सृष्टिः शक्तिमान् सप्तमीप्रियः ।
सुमेधा मेधिको मेध्यो मेधावी मधुसूदनः ॥१०१॥

अङ्गिरा गतिकालज्ञो धूमकेतुः सुकेतनः ।
सुखी सुखप्रदः सौख्यं कान्तिः कान्तिप्रदो मुनिः ॥१०२॥





सन्तापनः सन्तपन आतपस्तपसां पतिः ।
उमापतिः सहस्रांशुः प्रियकारी प्रियङ्करः ॥१०३॥

प्रीतिर्विमन्युरम्भोत्थः खंजनं जगतां पतिः ।
जगत्पिता प्रीतमनाः सर्वः खर्वो गुहोऽचलः ॥१०४॥

सर्वगो जगदानन्दो जगन्नेता सुरारिहा ।
श्रेयः श्रेयस्करो ज्यायान्महानुत्तम उद्भवः ॥१०५॥

उत्तमो मेरुमेयोऽथ धारणो धरणीधरः ।
धाराधरो धर्मराजो धर्माधर्मप्रवर्तकः ॥१०६॥

रथाध्यक्षो रथपतिस्तरुणस्तनितोऽनलः ।
उत्तरोऽनुत्तरस्तापी अवाक्पतिरपां पतिः ॥१०७॥

पुण्यसंकीर्तनः पुण्यो हेतुर्लोकत्रयाश्रयः ।
स्वर्भानुर्विगतारिष्टो विशिष्टोत्कृष्टकर्मकृत् ॥१०८॥

व्याधिप्रणाशनः क्षेमः सुरः सर्वजितां वरः ।
एकनाथो रथाधीशः शनैश्चरपिता रविः ॥१०९॥

वैवस्वतः गुरुमृत्युः धर्मनित्यो महाव्रतः ।
प्रलम्भहारसंचारी प्रद्योतो द्योतितानलः ॥११०॥

सन्तापहृत्परो मंत्रो मंत्रमूर्तिर्महाबलः ।
श्रेष्ठात्मा सुप्रियः शम्भुर्मरुतामीश्वरेश्वरः ॥१११॥

संसारगतिविच्छेत्ता संसारार्णवतारकः ।
सप्तजिह्वः सहस्रार्चीं रत्नगर्भोऽपराजितः ॥११२॥

धर्मकेतुरमेयात्मा धर्माधर्मवरप्रदः ।
लोकसाक्षी लोकगुरुर्लोकेशश्छन्दवाहनः ॥११३॥

धर्मयूपो यूपवृक्षो धनुष्पाणिर्धनुर्धरः ।
पिनाकधृङ्महोत्साहो नैकमायो महाशनः ॥११४॥

वीरः शक्तिमतां श्रेष्ठः सर्वशस्त्रभृताम्वरः ।
ज्ञानगम्यो दुराराध्यो लोहितांगो विवर्धनः ॥११५॥

खगोऽन्धो धर्मदो नित्यो धर्मकृत् चित्रविक्रमः ।
भगवान् स्वात्मको मन्त्रस्त्र्यक्षरो नीललोहितः ॥११६॥

एकोऽनेकस्त्रयीकालः सविता समितिञ्जयः ।
शार्ङ्गधन्वा नलो भीमः सर्वप्रहरणायुधः ॥११७॥

अकृन्तः परमेष्ठो च नाकपाली दिवि स्थितः ।
वदान्यो वासुकी नैव आत्रेयोऽथ पराक्रमः ॥११८॥

द्वापरः परमोदारः परङ्कः ब्रह्मचर्यवान् ।
उदीच्यवेशो मुकुटी पद्महस्त हिमांशुभृत् ॥११९॥

स्मितः प्रसन्नवदनः पद्मोदर-निभाननः ।
सायं दिवा दिव्यवपुरनिर्देश्यो महालयः ॥१२०॥

महारथो महानीशः शेषः सत्त्वरजस्तमः ।
धृतातपत्रप्रतिमो विमर्षी निर्णयः स्थितः ॥१२१॥

अहिंसकः शुद्धमतिरद्वितीयो विवर्धनः ।
सर्वदो धनदो मोक्षो विहारी बहुदायकः ॥१२२॥

चारुरात्रिर्हरो नाथो भगवान् सर्वगोऽव्ययः ।
मनोहरवपुः शुभ्रः शोभनः सुप्रभावनः ॥१२३॥

सुप्रभावः सुप्रतापः सुनेत्रो दिग्विदिक्पतिः ।
राज्ञो-प्रियः शब्दकरो ग्रहेशस्तिमिरापहः ॥१२४॥

सैंहिकेयरिपुर्देवो वरदो वरनायकः ।
चतुर्भुजो महायोगी योगीश्वरपतिस्तथा ॥१२५॥

एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ।
नाम्नां सहस्रं सवितुः पाराशर्यो यदाह मे ॥१२६॥





धन्यं यशस्यमायुष्यं दुःखदुस्वप्ननाशनम् ।
बन्धमोक्षकरञ्चैव भानोर्नामानुकीर्तनम् ॥१२७॥

यस्त्विदं शृणुयान्नित्यं पठेद्वा प्रयतो नरः ।
अक्षयं स्वर्गमन्वाद्यं भवेत्तस्योपसाधितम् ॥१२८॥

नृपाग्नि-तस्करभयं व्याधितो न भयं भवेत् ।
विजयी च भवेन्नित्यमाश्रयं परमाप्नुयात् ॥१२९॥

कीर्तिमान् सुभगो विद्वान् स सुखी प्रियदर्शनः ।
जीवेद्वर्षशतायुश्च सर्वव्याधिविवर्जितः ॥१३०॥

नाम्नां सहस्रमिदमंशुमतः पठेद् यः
प्रातः शुचिर्नियमवान् सुसमृद्धियुक्तः ।
रेण तं परिहरन्ति सदैव रोगा
भूताः सुपर्णमिव सर्वमहोरगेन्द्राः ॥१३१॥

इति भविष्योत्तरपुराणे सप्तमीकल्पे श्रीभगवत्सूर्यस्य
सहस्रनामस्तोत्रं समाप्तम् ।

# श्रीकाली-सहस्रनामस्तोत्रम्

श्रीशिव उवाच

कथितोऽयं महामन्त्रः सर्वमन्त्रोत्तमोत्तमः ।
यमासाद्य मया प्राप्तमैश्वर्यपदमुत्तमम् ॥१॥

संयुक्तः परया भक्त्या यथोक्तविधिना भवान् ।
कुरुतामर्च्चनं देव्यास्त्रैलोक्यविजिगीषया ॥२॥

श्रीपरशुराम उवाच

प्रसन्नो यदि मे देव पुरारे भक्तवत्सल ।
रहस्यं परया देव्याः कृपया कथय प्रभो ॥३॥

विनार्च्चनं विना होमं विना न्यासं विना बलिम् ।
विना गन्धं विना पुष्पं विना नित्योदितां क्रियाम् ॥४॥

प्राणायामं विना ध्यानं विना भूतविशोधनम् ।
विना जपं विना दानं येन काली प्रसीदति ॥५॥

श्रीशिव उवाच

पृष्टं त्वयोत्तमं प्राज्ञ भृगुवंशसमुद्भव ।
भक्तानामपि भक्तोऽसि त्वमेव साधयिष्यसि ॥६॥

देवीं दानवकोटिघ्नीं लीलया रुधिरप्रियाम् ।
सदा स्तोत्रप्रियां उग्रां कामकौतुकलालसाम् ॥७॥

सर्वदानन्दहृदयामासवासक्तमानसाम् ।
माध्वीकमत्स्यमांसानुरागिणीं रुधिरप्रियाम् ॥८॥

श्मशानवासिनीं प्रेतगणनृत्यमहोत्सवाम् ।
योगप्रभां योगिनीशां योगीन्द्रहृदयस्थिताम् ॥९॥





तामुग्रकालिकां राम प्रसादयितुमर्हसि ।
तस्याः स्तोत्रं महापुण्यं स्वयं काल्या प्रकाशितम् ॥१०॥

तव तत्कथयिष्यामि श्रुत्वा वत्सावधारय ।
गोपनीयं प्रयत्नेन पठनीयं परात्परम् ॥११॥

यस्यैककालपठनात्सर्वविघ्नाः समाकुलाः ।
नश्यन्ति दहने दीप्ते पतंगा इव सर्वतः ॥१२॥

गद्यपद्यमयी वाणी तस्य गंगाप्रवाहवत् ।
तस्य दर्शनमात्रेण वादिनो निष्प्रभा मताः ॥१३॥

राजानोऽपि च दासत्वं भजन्ते किं परे जनाः ।
तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः ॥१४॥

निशीथे मुक्तकेशस्तु नग्नः शक्तिसमन्वितः ।
मनसा चिन्तयेत्कालीं महाकालेन लालिताम् ॥१५॥

पठेत्सहस्रनामाख्यं स्तोत्रं मोक्षस्य साधनम् ।
प्रसन्ना कालिका तस्य पुत्रत्वेनानुकम्पते ॥१६॥

यथा ब्रह्मामृतैर्ब्रह्मकुसुमैः पूजिता परा ।
प्रसीदति तथानेन सदा काली प्रसीदति ॥१७॥

अथोच्यते महाकाल्याः स्वतः सर्वार्थसिद्धिदः ।
पूजाफलं तथा न्यासः स्तवमात्रेण सिद्ध्यति ॥१८॥

महाकालेन यत्प्रोक्तं स्तवं तच्छृणु भार्गव ।
ओं अस्य श्रीदक्षिणकालिकासहस्रनामस्तोत्रस्य भैरव
ऋषिरनुष्टुप्छन्दः श्मशानकालिक देवता सकलाभीष्टार्थे
विनियोगः ॥१९॥

ओं श्मशानकालिका काली भद्रकाली कपालिनी ।
गुह्यकाली महाकाली कुरुकुल्लाविरोधिनी ॥२०॥

कालिका कालरात्रिश्च महाकालनितम्बिनी ।
कालभैरवभार्य्या च कुलवर्त्मप्रकाशिनी ॥२१॥

कामदा कामिनी काम्या कमनीयस्वभाविनी ।
कस्तूरीरसलिप्तांगी कुञ्जरेश्वरगामिनी ॥२२॥

ककारवर्णसर्वांगी कामिनी कामसुन्दरी ।
कामार्त्ता कामरूपा च कामधेनुः कलावती ॥२३॥

कान्ता कामस्वरूपा च कामाख्या कुलपालिनी ।
कुलीना कुलवत्यम्बा दुर्गा दुर्गतिनाशिनी ॥२४॥

कौमारी कुलजा कृष्णा कृष्णदेहा कृशोदरी ।
कृशाङ्गी कुलिशांगी च क्रींकारी कमला कला ॥२५॥

करालास्या कराली च कुलकान्तापराजिता ।
उग्रा उग्रप्रभा दीप्ता विप्रचित्ता महानना ॥२६॥

नीलाघना बलाका च मात्रा मुद्रामिताऽसिता ।
ब्राह्मी नारायणी भद्रा सुभद्रा भक्तवत्सा ॥२७॥

माहेश्वरी च चामुण्डा वाराही नारसिंहिका ।
वज्रांगी वज्रकङ्काली नृमुण्डस्रग्विणी शिवा ॥२८॥

मालिनी नरमुण्डाली गलद्रुधिरभूषणा ।
रक्तचन्दनसिक्तांगी सिन्दूरारुणमस्तका ॥२९॥

घोररूपा घोरदंष्ट्रा घोराघोरतरा शुभा ।
महादंष्ट्रा महामाया सुदती युगदन्तुरा ॥३०॥

सुलोचना विरूपाक्षी विशालाक्षी त्रिलोचना ।
शारदेन्दुप्रसन्नास्या स्फुरत्स्मेराम्बुजेक्षणा ॥३१॥

अट्टहासप्रसन्नास्या स्मेरवक्त्रा सुभाषिणी ।
प्रसन्नपद्मवदना स्मितास्या प्रियभाषिणी ॥३२॥





कोटराक्षी कुलश्रेष्ठा महती बहुभाषिणी ।
सुमतिः कुमतिश्चण्डा चण्डमुण्डातिवेगिनी ॥३३॥

प्रचण्डचण्डिका चण्डी चण्डिका चण्डवेगिनी ।
सुकेशी मुक्तकेशी च दीर्घकेशी महत्कचा ॥३४॥

प्रेतदेहकर्णपूरा प्रेतपाणिसुमेखला ।
प्रेतासना प्रियप्रेता प्रेतभूमिकृतालया ॥३५॥

श्मशानवासिनी पुण्या पुण्यदा कुलपण्डिता ।
पुण्यालया पुण्यदेहा पुण्यश्लोका च पावनी ॥३६॥

पूता पवित्रा परमा पुरापुण्यविभूषणा ।
पुण्यनाम्नी भीतिहरा वरदा खड्गपालिनी ॥३७॥

नृमुण्डहस्तशस्ता च छिन्नमस्ता सुनासिका ।
दक्षिणा श्यामला श्यामा शान्ता पीनोन्नतस्तनी ॥३८॥

दिगम्बरा घोररावा सृक्कान्ता रक्तवाहिनी ।
घोररावा शिवासंगी विसंगी मदनातुरा ॥३९॥

मत्ता प्रमत्ता प्रमदा सुधासिन्धुनिवासिनी ।
अतिमत्ता महामत्ता सर्वाकर्षणकारिणी ॥४०॥

गीतप्रिया वाद्यरता प्रेतनृत्यपरायणा ।
चतुर्भुजा दशभुजा अष्टादशभुजा तथा ॥४१॥

कात्यायनी जगन्माता जगतां परमेश्वरी ।
जगद्बन्धुर्जगद्धात्री जगदानन्दकारिणी ॥४२॥

जगज्जीवमयी हैमवती माया महामही ।
नागयज्ञोपवीतांगी नागिनी नागशायिनी ॥४३॥

नागकन्या देवकन्या गान्धर्वी किन्नरेश्वरी ।
मोहरात्रिर्महारात्रिर्दारुणा भास्वरासुरी ॥४४॥

विद्याधरी वसुमती यक्षिणी योगिनी जरा ।
राक्षसी डाकिनी वेदमयी वेदविभूषणा ॥४५॥
श्रुतिः स्मृतिर्महाविद्या गुह्यविद्या पुरातनी ।
चिन्त्याऽचिन्त्या स्वधा स्वाहा निद्रा तन्द्रा च पार्वती ॥४६॥
अपर्णा निश्चला लोला सर्वविद्या तपस्विनी ।
गंगा काशी शची सीता सती सत्यपरायणा ॥४७॥
नीतिः सुनीतिः सुरुचिस्तुष्टिः पुष्टिर्धृतिः क्षमा ।
वाणी बुद्धिर्महालक्ष्मीर्लक्ष्मीर्नीलसरस्वती ॥४८॥
स्रोतस्वती सरस्वती मातंगी विजया जया ।
नदीसिन्धुः सर्वमयी तारा शून्यनिवासिनी ॥४९॥
शुद्धा तरंगिणी मेधा लाकिनी बहुरूपिणी ।
स्थूला सूक्ष्मा सूक्ष्मतरा भगवत्यनुरागिणी ॥५०॥
परमानन्दरूपा च चिदानन्दस्वरूपिणी ।
सर्वानन्दमयी नित्या सर्वानन्दस्वरूपिणी ॥५१॥
शुभदा नन्दिनी स्तुत्या स्तवनीयस्वभाविनी ।
रंकिनी भंकिनी चित्रा विचित्रा चित्ररूपिणी ॥५२॥
पद्मा पद्मालया पद्ममुखी पद्मविभूषणा ।
हाकिनी शाकिनी शान्ता राकिनी रुधिरप्रिया ॥५३॥
भ्रान्तिर्भवानी रुद्राणी मृडानी शत्रुमर्दिनी ।
उपेन्द्राणी महेन्द्राणी ज्योत्स्ना चन्द्रस्वरूपिणी ॥५४॥
सूर्य्यात्मिका रुद्रपत्नी रौद्री स्त्रीप्रकृतिः पुमान् ।
शक्तिः सूक्तिर्मतिर्माता भुक्तिर्मुक्तिः पतिव्रता ॥५५॥
सर्वेश्वरी सर्वमाता शर्वाणी हरवल्लभा ।
सर्वज्ञा सिद्धिदा सिद्धा भव्या भाव्या भयापहा ॥५६॥





कर्त्री हर्त्री पालयित्री शर्वरी तामसी दया ।
तमिस्रा तामसी स्थाणुः स्थिरा धीरा तपस्विनी ॥ ५७ ॥
चार्वंगी चञ्चला लोलजिह्वा चारुचरित्रिणी ।
त्रपा त्रपावती लज्जा विलज्जा ह्री रजोवती ॥ ५८ ॥
सरस्वती धर्मनिष्ठा श्रेष्ठा निष्ठुरनादिनी ।
गरिष्ठा दुष्टसंहर्त्री विशिष्टा श्रेयसी घृणा ॥ ५९ ॥
भीमा भयानका भीमनादिनी भीः प्रभावती ।
वागीश्वरी श्रीर्यमुना यज्ञकर्त्री यजुःप्रिया ॥ ६० ॥
ऋक्सामाथर्वनिलया रागिणी शोभनस्वरा ।
कलकण्ठी कम्बुकण्ठी वेणुवीणापरायणा ॥ ६१ ॥
वंशिनी वैष्णवी स्वच्छा धरित्री जगदीश्वरी ।
मधुमती कुण्डलिनी ऋद्धिः सिद्धिः शुचिस्मिता ॥ ६२ ॥
रम्भोर्वशीरतीरामा रोहिणी रेवती मघा ।
शंखिनी चक्रिणी कृष्णा गदिनी पद्मिनी तथा ॥ ६३ ॥
शूलिनी परिघास्त्रा च पाशिनी शार्ङ्गपालिनी ।
पिनाकधारिणी धूम्रा शरभी वनमालिनी ॥ ६४ ॥
रथिनी समरप्रीता वेगिनी रणपण्डिता ।
जटिनी वज्रिणी लीला लावण्याम्बुधिचन्द्रिका ॥ ६५ ॥
बलिप्रिया सदापूज्या पूर्णा दैत्येन्द्रमाथिनी ।
महीषासुरसंहर्त्री कामिनी रक्तदन्तिका ॥ ६६ ॥
रक्तपा रुधिराक्तांगी रक्तखर्परहस्तिनी ।
रक्तप्रिया मांसरुचिरासवासक्तमानसा ॥ ६७ ॥
गलच्छोणितमुण्डाली कण्ठमालाविभूषणा ।
शवासना चितान्तःस्था माहेशी वृषवाहिनी ॥ ६८ ॥

व्याघ्रत्वचम्बरा चीनचेलिनी सिंहवाहिनी ।
वामदेवी महादेवी गौरी सर्वज्ञभामिनी ॥ ६९ ॥

बालिका तरुणी वृद्धा वृद्धमाता जरातुरा ।
सुभ्रूर्विलासिनी ब्रह्मवादिनी ब्राह्मणी मही ॥ ७० ॥

स्वप्नावती चित्रलेखा लोपामुद्रा सुरेश्वरी ।
अमोघारुन्धती तीक्ष्णाभोगवत्यनुरागिणी ॥ ७१ ॥

मन्दाकिनी मन्दहासा ज्वालामुख्यसुरान्तका ।
मानदा मानिनी मान्या माननीया मदातुरा ॥ ७२ ॥

मदिरामेदुरोन्मादा मेध्या साध्या प्रसादिनी ।
सुमध्यानन्तगुणिनी सर्वलोकोत्तमोत्तमा ॥ ७३ ॥

जयदा जित्वरा जैत्री जगश्रीर्जयशालिनी ।
शुभदा सुखदा सत्या सभासंक्षोभकारिणी ॥ ७४ ॥

शिवदूती भूतिमती विभूतेर्भीषणानना ।
कौमारी कुलजा कुन्ती कुलस्त्री कुलपालिका ॥ ७५ ॥

कीर्तिर्यशस्विनी भूषा भूष्या भूतपतिप्रिया ।
सगुणा निर्गुणी तृष्णा निष्ठा काष्ठा प्रतिष्ठिता ॥ ७६ ॥

धनिष्ठा धनदा धान्या वसुधा सुप्रकाशिनी ।
उर्वी गुर्वी गुरुश्रेष्ठा सद्गुणा त्रिगुणात्मिका ॥ ७७ ॥

राज्ञामाज्ञा महाप्राज्ञा सगुणा निर्गुणात्मिका ।
महाकुलीना निष्कामा सकामा कामजीवनी ॥ ७८ ॥

कामदेवकला रामाभिरामा शिवनर्तकी ।
चिन्तामणिः कल्पलता जाग्रती दीनवत्सला ॥ ७९ ॥

कार्तिकी कृत्तिका कृत्या अयोध्याविषमासमा ।
सुमन्त्रा मन्त्रिणी पूर्णा ह्लादिनी क्लेशनाशिनी ॥ ८० ॥





त्रैलोक्यजननी ज्येष्ठा मीमांसामन्त्ररूपिणी ।
तडागनिम्नजठरा शुष्कमांसास्थिमालिनी ॥८१॥

अवन्तीमथुराहृद्या त्रैलोक्यपावनक्षमा ।
व्यक्ताव्यक्तात्मिकामूर्तिः शरभीभीमनादिनी ॥८२॥

क्षेमंकरी शंकरी च सर्वसम्मोहकारिणी ।
ऊर्ध्वतेजस्विनी क्लिन्ना महातेजस्विनी तथा ॥८३॥

अद्वैतभोगिनी पूज्या युवती सर्वमंगला ।
सर्वप्रियंकरी भोग्या धरणी पिशिताशना ॥८४॥

भयंकरी पापहरा निष्कलंका वशंकरी ।
आशा तृष्णा चन्द्रकला इन्द्राणी वायुवेगिनी ॥८५॥

सहस्रसूर्य्यसंकाशा चन्द्रकोटिसमप्रभा ।
निशुम्भशुम्भसंहन्त्री रक्तबीजविनाशिनी ॥८६॥

मधुकैटभहन्त्री च महिषासुर-घातिनी ।
वह्निमण्डलमध्यस्था सर्वसत्त्वप्रतिष्ठिता ॥८७॥

सर्वाचारवती सर्वदेवकन्याधिदेवता ।
दक्षकन्या दक्षयज्ञनाशिनी दुर्गतारिणी ॥८८॥

इज्या पूज्या विभीर्भूतिः सत्कीर्तिर्ब्रह्मरूपिणी ।
रम्भोरुश्चतुराकारा जयन्ती करुणा कुहूः ॥८९॥

मनस्विनी देवमाता यशस्या ब्रह्मचारिणी ।
सिद्धिदा वृद्धिदा वृद्धिः सर्वाद्या सर्वदायिनी ॥९०॥

अगाधरूपिणी ध्येया मूलाधारनिवासिनी ।
आज्ञा प्रज्ञा पूर्णमनाश्चन्द्रमुख्यनुकूलिनी ॥९१॥

वावदूका निम्ननाभिः सत्यसन्धा दृढव्रता ।
आन्वीक्षिकी दण्डनीतिस्त्रयी त्रिदिवसुन्दरी ॥९२॥

उज्वलिनी ज्वालिनी शैलसमया विन्ध्यवासिनी ।
प्रत्यया खेचरी धैर्या तुरीया विमलातुरा ॥९३॥

प्रगल्भा वारुणीच्छाया शशिनी विस्फुलिंगिनी ।
भक्तिः सिद्धिः सदा प्रीतिः प्राकाम्या महिमाणिमा ॥९४॥

इच्छासिद्धिर्वशित्वा च ईशित्वोर्ध्वनिवासिनी ।
लघिमा चैव गायत्री सावित्री भुवनेश्वरी ॥९५॥

मनोहरा चिता दिव्या देव्युदारा मनोरमा ।
पिंगला कपिला जिह्वारसज्ञा रसिका रमा ॥९६॥

सुषुम्नेडायोगवती गान्धारी नरकान्तका ।
पाञ्चाली रुक्मिणी राधा राध्या भामा च राधिका ॥९७॥

अमृता तुलसी वृन्दा कैटभी कपटेश्वरी ।
उग्रचण्डेश्वरी वीरजननी वीरसुन्दरी ॥९८॥

उग्रतारा यशोदाख्या देवकी देवमानिता ।
निरञ्जनाचिता देवी क्रोधिनी कुलदीपिका ॥९९॥

कुलवागीश्वरी ज्वाला मातृका द्राविणी द्रवा ।
योगेश्वरी महामारी भ्रामरी विन्दुरूपिणी ॥१००॥

दूती प्राणेश्वरी गुप्ता बहुला डामरी प्रभा ।
कुब्जिका ज्ञानिनी ज्येष्ठा भुशुण्डी प्रकटाकृतिः ॥१०१॥

द्राविणी गोपिनी माया कामबीजेश्वरी प्रिया ।
शाकम्भरी कोकनदा सुशीला च तिलोत्तमा ॥१०२॥

अमेयविक्रमाक्रूरा सम्पच्छीलातिविक्रमा ।
स्वस्तिहव्यवहा प्रीतिरुष्मा धूम्रार्चिरङ्गदा ॥१०३॥

तपिनी तापिनी विश्वा भोगदा भोगधारिणी ।
त्रिखण्डा बोधिनी वश्या सकला विश्वरूपिणी ॥१०४॥





बीजरूपा महामुद्रा वशिनी योगरूपिणी ।
अनगकुसुमानंगमेखलानंगरूपिणी ॥१०५॥

अनंगमदनानंगरेखानंगांकुशेश्वरी ।
अनंगमालिनी कामेश्वरी सर्वार्थसाधिका ॥१०६॥

सर्वतन्त्रमयी मोदिन्यरुणानंगरूपिणी ।
वज्रेश्वरी च जननी सर्वदुःखक्षयंकारी ॥१०७॥

षड्ङ्गयुवती योगयुक्ता ज्वालांशुमालिनी ।
दुराशया दुराधर्षा दुर्ज्ञेया दुर्गरूपिणी ॥१०८॥

दुरन्ता दुष्कृतिहरा दुर्ध्येया दुरतिक्रमा ।
हंसेश्वरी त्रिकोणस्था शाकम्भर्यनुकम्पिनी ॥१०९॥

त्रिकोणनिलया नित्या परमामृतरञ्जिता ।
महाविद्येश्वरी श्वेता भेरुण्डा कुलसुन्दरी ॥११०॥

त्वरिता भक्तिसंयुक्ता भक्तिवश्या सनातनी ।
भक्तानन्दमयी भक्तभाविता भक्तशंकरी ॥१११॥

सर्वसौन्दर्यनिलया सर्वसौभाग्यशालिनी ।
सर्वसम्भोगभवनी सर्वसौख्यानुरूपिणी ॥११२॥

कुमारीपूजनरता कुमारीव्रतचारिणी ।
कुमारी भक्तिसुखिनी कुमारीरूपधारिणी ॥११३॥

कुमारीपूजकप्रीता कुमारीप्रीतिदप्रिया ।
कुमारीसेवकासंगा कुमारीसेवकालया ॥११४॥

आनन्दभैरवी बालभैरवी बटुभैरवी ।
श्मशानभैरवी कालभैरवी पुरभैरवी ॥११५॥

महाभैरवपत्नी च परमानन्दभैरवी ।
सुरानन्दभैरवी च उत्तमानन्दभैरवी ॥११६

मुक्त्यानन्दभैरवी च तथा तरुणभैरवी ।
ज्ञानानन्दभैरवी च अमृतानन्दभैरवी ॥११७॥

महाभयंकरी तीव्रा तीव्रवेगा तरस्विनी ।
त्रिपुरा परमेशानी सुन्दरी पुरसुन्दरी ॥११८॥

त्रिपुरेशी पञ्चदशी पञ्चमी पुरवासिनी ।
महासप्तदशी चैव षोडशी त्रिपुरेश्वरी ॥११९॥

महांकुशस्वरूपा च महाचक्रेश्वरी तथा ।
नवचक्रेश्वरी चक्रेश्वरी त्रिपुरमालिनी ॥१२०॥

राजचक्रेश्वरी वीरा महात्रिपुरसुन्दरी ।
सिन्दूरपूररुचिरा श्रीमत्त्रिपुरसुन्दरी ॥१२१॥

सर्वांगसुन्दरी रक्ता रक्तवस्त्रोत्तरीयका ।
यवा यावकसिन्दूररक्तचन्दनधारिणी ॥१२२॥

यवायावकसिन्दूररक्तचन्दनरूपधृक् ।
चमरी वालकुटिलनिर्मलश्यामकेशिनी ॥१२३॥

वज्रमौक्तिकरत्नाढ्यकिरीटमुकुटोज्ज्वला ।
रत्नकुण्डलसंयुक्तस्फुरद्गण्डमनोरमा ॥१२४॥

कुञ्जरेश्वरकुम्भोत्थमुक्तारञ्जितनासिका ।
मुक्ताविद्रुममाणिक्यहाराढ्यस्तनमण्डला ॥१२५॥

सूर्यकान्तेन्दुकान्ताढ्यस्पर्शाश्मकण्ठभूषणा ।
बीजपूरस्फुरद्बीजदन्तपंक्तिरनुत्तमा ॥१२६॥

कामकोदण्डकाभुग्नभ्रूयुगाक्षिप्रवर्त्तिनी ।
मातंगकुम्भवक्षोजा लसत्कोकनदेक्षणा ॥१२७॥

मनोज्ञशष्कुलीकर्णा हंसीगतिविडम्बिनी ।
पद्मरागांगदद्योतदोश्चतुष्कप्रकाशिनी ॥१२८॥





नानामणिपरिस्फूर्यच्छुद्धकाञ्चनकंकणा ।
नागेन्द्रदन्तनिर्माणवलयाञ्चितपाणिका ॥१२९॥

अंगुरीयकचित्रांगी विचित्रक्षुद्रघण्टिका ।
पट्टाम्बरपरीधाना कलमञ्जीररञ्जिनी ॥१३०॥

कर्पूरागुरुकस्तूरीकुंकुमद्रवलेपिता ।
विचित्ररत्नपृथिवीकल्पशाखातलस्थिता ॥१३१॥

रत्नद्वीपस्फुरद्रत्नसिंहासननिवासिनी ।
षट्चक्रभेदनकरी परमानन्दरूपिणी ॥१३२॥

सहस्रदलपद्मान्तश्चन्द्रमण्डलवर्त्तिनी ।
ब्रह्मरूपशिवक्रोडनानासुखविलासिनी ॥१३३॥

हरविष्णुविरिञ्चीन्द्रग्रहनायकसेविता ।
आत्मयोनिर्ब्रह्मयोनिर्जगद्योनिरयोनिजा ॥१३४॥

भगरूपा भगस्थात्री भगिनी भगधारिणी ।
भगात्मिका भगाधाररूपिणी भगशालिनी ॥१३५॥

लिंगाभिधायिनी लिंगप्रियालिंगनिवासिनी ।
लिंगस्था लिंगिनी लिंगरूपिणी लिंगसुन्दरी ॥१३६॥

लिंगगीतिमहाप्रीतिर्भगगीतिमहासुखा ।
लिंगनामसदानन्दा भगनामसदारतिः ॥१३७॥

भगनामसदानन्दा लिंगनामसदारतिः ।
लिंगमालाकण्ठभूषा भगमालाविभूषणा ॥१३८॥

भगलिंगामृतप्रीता भगलिंगामृतात्मिका ।
भगलिंगार्च्चनप्रीता भगलिंगस्वरूपिणी ॥१३९॥

भगलिंगस्वरूपा च भगलिंगसुखावहा ।
स्वयम्भूकुसुमप्रीता स्वयम्भूकुसुमार्च्चिता ॥१४०॥

स्वयम्भूकुसुमप्राणा स्वयम्भूकुसुमोत्थिता ।
स्वयम्भूकुसुमस्नाता स्वयम्भूपुष्पतर्पिता ॥१४१॥

स्वयम्भूपुष्पघटिता स्वयम्भूपुष्पधारिणी ।
स्वयम्भूपुष्पतिलका स्वयम्भूपुष्पचर्च्चिता ॥१४२॥

स्वयम्भूपुष्पनिरता स्वयम्भूकुसुमग्रहा ।
स्वयम्भूपुष्पयज्ञांगा स्वयम्भूकुसुमात्मिका ॥१४३॥

स्वयम्भूपुष्परचिता स्वयम्भूकुसुमप्रिया ।
स्वयम्भूकुसुमादानलालसोन्मत्तमानसा ॥१४४॥

स्वयम्भूकुसुमानन्दलहरीस्निग्धदेहिनी ।
स्वयम्भूकुसुमाधारा स्वयम्भूकुसुमाकुला ॥१४५॥

स्वयम्भूपुष्पनिलया स्वयम्भूपुष्पवासिनी ।
स्वयम्भूकुसुमस्निग्धा स्वयम्भूकुसुमोत्सुका ॥१४६॥

स्वयम्भूपुष्पकारिणी स्वयम्भूपुष्पपालिका ।
स्वयम्भूकुसुमध्याना स्वयम्भूकुसुमप्रभा ॥१४७॥

स्वयम्भूकुसुमज्ञाना स्वयम्भूपुष्पभोगिनी ।
स्वयम्भूकुसुमज्ञाना स्वयम्भूपुष्पवर्षिणी ॥१४८॥

स्वयम्भूकुसुमोत्साहा स्वयम्भूपुष्पपुष्पिणी ।
स्वयम्भूकुसुमोत्संगा स्वयम्भूपुष्परूपिणी ॥१४९॥

स्वयम्भूकुसुमोन्मादा स्वयम्भूपुष्पसुन्दरी ।
स्वयम्भूकुसुमाराध्या स्वयम्भूकुसुमोद्भवा ॥१५०॥

स्वयम्भूकुसुमव्यग्रा स्वयम्भूपुष्पवर्णिता ।
स्वयम्भूपूजकप्रज्ञा स्वयम्भूहोतृमातृका ॥१५१॥

स्वयम्भूदातृरक्षित्री स्वयम्भूभक्तभाविका ।
स्वयम्भूकुसुमप्रज्ञा स्वयम्भूपूजकप्रिया ॥१५२॥





स्वयम्भूवन्दकाधारा स्वयम्भूनिन्दकान्तका ।
स्वयम्भूप्रदसर्वस्वा स्वयम्भूप्रदरूपिणी ॥१५३॥

स्वयम्भूप्रदसस्मेरा स्वयम्भूशरीरिणी ।
सर्वकालोद्भवप्रीता सर्वकालोद्भवात्मिका ॥१५४॥

सर्वकालोद्भवोद्भावा सर्वकालोद्भवोद्भवा ।
कुण्डपुष्पसदाप्रीतिर्गोलपुष्पसदारतिः ॥१५५॥

कुण्डगोलोद्भवप्रीता कुण्डगोलोद्भवात्मिका ।
शुक्राधारा शुक्ररूपा शुक्रसिन्धुनिवासिनी ॥१५६॥

शुक्रालया शुक्रभोगा शुक्रपूजासदारतिः ।
रक्ताशया रक्तभोगा रक्तपूजासदारतिः ॥१५७॥

रक्तपूजा रक्तहोमा रक्तस्था रक्तवत्सला ।
रक्तवर्णा रक्तदेहा रक्तपूजकपुत्रिणी ॥१५८॥

रक्तद्युती रक्तस्पृहा देवी च रक्तसुन्दरी ।
रक्ताभिधेया रक्तार्हा रक्तकन्दरवन्दिता ॥१५९॥

महारक्ता रक्तभवा रक्तसृष्टिविधायिनी ।
रक्तस्नाता रक्तसिक्ता रक्तसेव्यातिरक्तिनी ॥१६०॥

रक्तानन्दकरी रक्तसदानन्दविधायिनी ।
रक्ताशया रक्तपूर्णा रक्तसेव्या मनोरमा ॥१६१॥

रक्तपूजकसर्वस्वा रक्तनिन्दकनाशिनी ।
रक्तात्मिका रक्तरूपा रक्ताकर्षणकारिणी ॥१६२॥

रक्तोत्साहा च रक्ताढ्या रक्तपानपरायणा ।
शोणितानन्दजननी कल्लोलस्निग्धरूपिणी ॥१६३॥

साधकान्तर्गता देवी पायिनी पापनाशिनी ।
साधकानां सुखकरी साधकारिविनाशिनी ॥१६४॥

साधकानां हृदिस्थात्री साधकानन्दकारिणी ।
साधकानाञ्च जननी साधकप्रियकारिणी ॥१६५॥

साधकप्रचुरानन्दसम्पत्तिसुखदायिनी ।
शुक्रपूज्या शुक्रहोमसन्तुष्टा शुक्रवत्सला ॥१६६॥

शुक्रमूर्तिः शुक्रदेहा शुक्रपूजकपुत्रिणी ।
शुक्रस्था शुक्रिणी शुक्रसंस्पृहा शुक्रसुन्दरी ॥१६७॥

शुक्रस्नाता शुक्रकरी शुक्रसेव्यातिशुक्रिणी ।
महाशुक्रा शुक्रभवा शुक्रवृष्टिविधायिनी ॥१६८॥

शुक्राभिधेया शुक्रार्हाशुक्रवन्दकवन्दिता ।
शुक्रानन्दकरी शुक्रसदानन्दविधायिनी ॥१६९॥

शुक्रोत्सवा सदाशुक्रपूर्णा शुक्रमनोरमा ।
शुक्रपूजकसर्वस्वा शुक्रनिन्दकनाशिनी ॥१७०॥

शुक्रात्मिका शुक्रसम्पच्छुक्राकर्षणकारिणी ।
सारदा साधकप्राणा साधकासक्तमानसा ॥१७१॥

साधकोत्तमसर्वस्वसाधिका भक्तवत्सला ।
साधकानन्दसन्तोषा साधकाधिविनाशिनी ॥१७२॥

आत्मविद्या ब्रह्मविद्या परब्रह्मस्वरूपिणी ।
त्रिकूटस्था पञ्चकूटा सर्वकूटशरीरिणी ।
सर्ववर्णमयी वर्णजपमालाविधायिनी ॥१७३॥

श्रीशंकर उवाच

इति श्रीकालिकानाम्नां सहस्रं शक्तिभाषितम् ।
गुह्याद्गुह्यतरं साक्षान्महापातकनाशनम् ॥१७४॥

पूजाकाले निशाये च सन्ध्ययोरुभयोरपि ।
लभते गाणपत्यं स यः पठेत्साधकोत्तमः ॥१७५॥





यः पठेत्पाठयेद्वापि शृणोति श्रावयेदपि ।
सर्वपापविनिर्मुक्तः स याति कालिकालयम् ॥ १७६ ॥

श्रद्धयाश्रद्धया वापि यः कश्चिन्मानवः पठेत् ।
दुर्गाद्दुर्गतरं तीर्त्वा स याति परमां गतिम् ॥ १७७ ॥

वन्ध्या वा काकवन्ध्या वा मृतवत्सा च यांगना ।
श्रुत्वा स्तोत्रमिदं पुत्राँल्लभते चिरजीविनः ॥ १७८ ॥

यं यं कामयते कामं पठेत्स्तोत्रमनुत्तमम् ।
देवीवरप्रसादेन तं तं प्राप्नोति नित्यशः ॥ १७९ ॥

स्वयम्भूकुसुमैः शुक्रैः सुगन्धिकुसुमान्वितैः ।
यवायावकसिन्दूररक्तचन्दनसंयुतैः ॥ १८० ॥

मत्स्यमांसादिभिर्वीर मधुभिः साज्यपायसैः ।
भक्तयोपनीतैर्मन्त्रेण साधितैः शक्तिभिः सह ॥ १८१ ॥

पञ्चोपचारैर्नैवेद्यैर्बलिभिर्बहुशोणितैः ।
धूपदीपैर्महादेवीं पूजयित्वा मनोहरं ॥ १८२ ॥

जप्त्वा महामनुं स्तोत्रं पठेद्भक्तिसमन्वितः ।
अनन्यचेता स्थिरधीर्मुक्तकेशो दिगम्बरः ॥ १८३ ॥

शवारूढश्चितास्थो वा श्मशानालयमागतः ।
शून्यालये गतो वापि शय्यास्थो वापि साधकः ॥ १८४ ॥

स भवेत्कालिकापुत्र इति ख्यातिमुपागतः ।
सर्वविद्यावतां श्रेष्ठो धनेन च धनाधिपः ॥ १८५ ॥

वायुतुल्यबली लोके दुर्जयः शत्रुमर्दनः ।
सर्वसंकटमुत्तीर्णः सर्वसिद्धिसमन्वितः ॥ १८६ ॥

मधुमत्या स्वयं देव्या सेव्यमानः स्मरोपमः ।
महेश इव योगीन्द्रः सर्वसिद्धिसमन्वितः ॥ १८७ ॥

कामिनीकामदेवोऽसौ सर्वाकर्षणकारकः ।
जलसूर्येन्दुवायूनां स्तम्भको राजवल्लभः ॥ १८८ ॥

यशस्वी सत्कविर्धीमान् सन्मन्त्री कोकिलस्वरः ।
बहुपुत्रो गजाश्वानामीश्वरो धार्मिकः कृती ॥ १८९ ॥

मार्कण्डेय इवायुष्मान् जरापलितवर्जितः ।
नवयौवनयुक्तः स्यादायुर्वर्षसहस्रभाक् ॥ १९० ॥

बहु किं कथ्यतां तस्य पठतस्तवमुत्तमम् ।
न किञ्चिद् दुर्लभं लोके तस्य स्यादभिवाञ्छितम् ॥ १९१ ॥

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।
सर्वं माशु प्रणश्येत्तु स्तवस्यास्य प्रसादतः ॥ १९२ ॥

रजस्वलाभगं पश्यन् जप्त्वा कालीमहामनुम् ।
स्तवेनानेन संस्तुत्यसाधकः किन्न साधयेत् ॥१९३॥

परदारपरो वापि जप्त्वा मन्त्रं पठंस्तवम् ।
कुबेर इव वित्ताढ्यो जायते मदनोपमः ॥१९४॥

अष्टोत्तरशतञ्जप्त्वा भगमामन्त्र्य तत्त्ववित् ।
संगम्य पठनादस्य सर्वविद्येश्वरो भवेत् ॥१९५॥

दिगम्बरो मुक्तकेशः शय्यास्थो मैथुनी नरः ।
जप्त्वा स्तुत्वा महाकालीं खेचरो जायतेऽचिरात् ॥१९६॥

शुक्रोत्सारणकाले तु जपपूजापरायणः ।
श्मशानकालिकां स्तुत्वा वाणीवत्सत्कविर्भवेत् ॥१९७॥

आलोकयंश्चिन्तयित्वा विवस्त्रां परयोषितम् ।
जप्त्वा स्तुत्वा महाकालीं सर्व पापैः प्रमुच्यते ॥१९८॥

सुरतेषु मनुञ्जप्त्वा स्तुत्वा भामवतीं शिवाम् ।
सर्व पापैः परित्यक्तो मानवः स्याच्छुकोपमः ॥१९९॥





कुहूपूर्णेन्दुसंक्रान्तौ चतुर्दश्यष्टमीषु च ।
नवम्यां मंगलदिने पठेत्स्तोत्रं सुसाधकः ॥२००॥

भौमावास्यां निशीथे च चतुष्पथगतो नरः ।
मांसभक्तबलिं दत्वा सदुग्धमीनशोणितम् ॥२०१॥

अष्टोत्तरशतञ्जत्वा पठेन्नामसहस्रकम् ।
सुदर्शनो भवेदाशु देवगन्धर्वसेवितः ॥२०२॥

सदाशिवो भवत्येव षण्मासाभ्यासयोगतः ।
येन तेन प्रकारेण कालीस्तुतिपरायणः ॥२०३॥

स्तम्भयेदखिलाँल्लोकान् राजानमपि मोहयेत् ।
आकर्षयेद् देवकन्यां वशयेदपि केशवम् ॥२०४॥

मारयेदखिलां दुष्टानुच्चाटयति शात्रवान् ।
नरमार्जारमहिषमूषकच्छागशोणितैः ॥२०५॥

सास्थिमांसैः समधुभिः सामृतैर्दुग्धपायसैः ।
योनिच्छालिततोतेन भगलिंगामृतेन च ॥२०६॥

शुक्रैः पूजाजपान्ते यः कालीं सन्तर्प्य साधकः ।
सहस्रनामभिर्देवीं स्तौति भक्तिपरायणः ॥२०७॥

मातेव कालिका तस्य सर्वत्र हितकारिणी ।
परनिन्दा-परद्रोह-परीवादपराय च ॥२०८॥

खलाय परतन्त्राय भ्रष्टायासाधकाय च ।
शिवाभक्ताय दुष्टाय दूषकाय दुरात्मने ॥२०९॥

हरिभक्तिविहीनाय परदारपराय च ।
पूजाजपविहीनाय स्त्रीसुरानिन्दकाय च ॥२१०॥

न स्तवं दर्शयेद्दिव्यं सन्दर्श्यं शिवहा भवेत् ।
कुलीनाय महेच्छाय दुर्गाभक्ति पराय च ॥२११॥

वैष्णवाय विशुद्धाय भक्तियुक्ताय मन्त्रिणे ।
अद्वैतानन्दरूपाय निवेदितपराय च ॥२१२॥

दद्यात्स्तोत्रं महाकाल्याः साधकाय तदाज्ञया ।
गुरुविष्णुमहेशानामभेदेन महेश्वरीम् ॥२१३॥

समस्तां भावयन्मन्त्री महेशो नात्र संशयः ।
स शाक्तः शिवभक्तश्च स एव वैष्णवोत्तमः ॥२१४॥

सम्पूज्य स्तौति यः कालीमद्वैतम्भावमावहन् ।
देव्यानन्देन सानन्दो देवीभक्तेन भक्तिमान् ॥२१५॥

स एव धन्यो यस्यार्थं महेशो व्यग्रमानसः ।
कामयित्वा यथाकामं स्तवमेनमुदीरयेत् ॥२१६॥

सर्वरोगैः परित्यक्तो जायते मदनोपमः ।
चक्रं वा स्तवमेनं वा धारयेदंगसंगतम् ॥२१७॥

विलिख्य विधिवत्साधुः स एव कालिकातनुः ।
देव्यै निवेदितं यद्यत्तत्सर्वं भक्षयेन्नरः ॥२१८॥

दिव्यदेहधरो भूत्वा देव्याः पार्श्वचरो भवेत् ।
नैवेद्यनिन्दकं दृष्ट्वा नृत्यन्ति योगिनीगणः ॥२१९॥

रक्तपानोद्यताः सर्वे मांसास्थिचर्वणोद्यताः ॥२२०॥

तस्मान्निवेदितं देव्यै दृष्ट्वा स्तुत्वा च मानवः ।
न निन्देन्मनसा वाचा सर्वव्याधिविवर्जितः ॥२२१॥

आत्मानं कालिकात्मानं भावयँस्तौति मानवः ।
शिवोपमं गुरुं ध्यात्वा स एव च सदाशिवः ॥२२२॥

यस्यालये तिष्ठति नूनमेतत् स्तोत्रं भवान्या लिखितं विधिज्ञैः ।
गोरोचनालक्तककुंकुमाद्यैः सिन्दूरकर्पूरमधुद्रवेण ॥२२३॥





न तत्र चोरस्य भयं कदाचिन्मनोऽन्यथा वाशनिवह्निभीतिः ।
उत्पातवायोरपि नात्र शंका लक्ष्मीः स्वयं तत्र वसेदलोला ॥२२४॥

स्तोत्रं पठन्नेतदनन्तपुण्यं कालीपदाम्भोजपरो मनुष्यः ।
विधानपूजाफलमेव सम्यक् प्राप्नोति संपूर्णमनोरथोऽसौ ॥२२५॥

मुक्ताः श्रीचरणारविन्दविमुखाः स्वर्गामिनो योगिनो
ब्रह्मोपेन्द्रशिवात्मकार्चनरतालोकेऽपि संलेभिरे ॥
श्रीमच्छंकरभक्तिपूर्वकमहाकालीपदध्यायिनो
भक्तिर्भुक्तिमती स्वयं स्तुतिपरा मुक्तिः करस्थायिनी ॥२२६॥

इति श्रीशिवपरशुरामसंवादे कालिकाकुलसर्वस्वे आद्या-
सहस्रनामस्तोत्रं सम्पूर्णम् ॥ शुभमस्तु । श्रीरस्तु ॥

## श्रीदुर्गा-सहस्रनामस्तोत्रम्

ॐ ह्रीं दुं जगदम्बाभा भद्रिका भद्रकालिका ।
प्रचण्डा चण्डिका चण्डी चण्डमुण्डनिषूदनी ॥१॥

अनसूयास्तुटिस्तारा कृत्तिका कुब्जिकालया ।
प्रलयास्थितिसम्भूतिर्विभूतिर्भयनाशिनी ॥२॥

महामाया महाविद्या मूलविद्या विदीश्वरी ।
मदालसा मदोत्तुङ्गा मदिरा मदनप्रिया ॥३॥

आलिर्व्यालिप्रसूः पण्या पवित्रा परमेश्वरी ।
आदिदेवी कलाकान्ता त्रिपुरा जगदीश्वरी ॥४॥

मनोनाममहालक्ष्मीः सिद्धिलक्ष्मीः सरस्वती ।
सरित् कादम्बरी गोदा गुह्यकाली गणेश्वरी ॥५॥

गणाम्बिका जया तापी तपना तापहारिणी ।
तपोमयी दुरालम्भा दुष्टग्रहनिवारिणी ॥६॥

दुःखहा सुखदा माध्वी परमा भूतसूः सुराः ।
सुधा सुधांशुनिलया प्रलयानलसन्निभा ॥७॥

समस्तसम्पदा भोजनिलया कलिकल्पथा ।
विद्येश्वरी विश्वमयी विराट् छन्दोगतिर्मतिः ॥८॥

धृतिदा दाम्बिकी दोला लोपामुद्रा पटीयसी ।
गरिष्ठा रिष्ठहा दुष्टा कृशा काशी कुलाकुला ॥९॥

अकुलस्यापदन्यासा न्यासरूपा विरूपिणी ।
विरूपाक्षा कोटराक्षी कुलकान्तापराजिता ॥१०॥

अजिता कुलिका लम्पा लम्पटा त्रिपुरेश्वरी ।
त्रितयी वेदविन्यासा संन्यासुर्मतिर्भया ॥११॥

अभया स्वमुखा देवी महौषधिरलम्बुसा ।
चपला चन्द्रिका चण्डा चण्डमुण्डनिषूदनी ॥१२॥





चपलाक्षी मदाविष्टा मदिरारुणलोचना ।
पुरीत्रिपुरसूराम्ना रमा रामा मनोरमा ॥१३॥

सन्ध्या सन्ध्याभ्रशीला च शाला श्यामपयोधरा ।
शशाङ्कमुकुटा श्यामा सुरासुन्दरलोचना ॥१४॥

विषमाक्षी विशालाक्षी वशा वागीश्वरी शिला ।
मनःशिला च कस्तूरी मृगनाभिर्मृगेक्षणा ॥१५॥

मृगारिवाहना माध्वी मानदा मत्तभाषिणी ।
नारसिंही वामदेवी वामा वामश्रुतिप्रिया ॥१६॥

पण्यापुण्यगतिः पुण्या पुत्री पुण्यजनप्रिया ।
चामुण्डा उग्रचण्डा च महाचण्डतमा उमा ॥१७॥

तमस्विनी प्रभा ज्योत्स्ना महाज्योतिःस्वरूपिणी ।
स्वरूपा सद्गतिः साध्वी सदा सद्रूपराजिता ॥१८॥

सृष्टिः स्थितिः क्षेमकरी क्षामा क्षामी व्रतिस्तनी ।
क्षोणी क्षयकरी क्षीणा सर्वस्या शिववल्लभा ॥१९॥

दन्तुरा दाडिमप्रीतिः दया दाम्बिकसूदिनी ।
राक्षसी डाकिनी योग्या योगिनी योगवल्लभा ॥२०॥

कबन्धा कन्दरा कृत्या कृत्तिका कण्टकान्तका ।
कलङ्करहिता काली कम्पा काश्मीरवल्लभा ॥२१॥

काशी कीर्तिप्रदा काञ्ची काश्मीरी कोकिलस्वना ।
प्रभावती महारौद्री रुद्रपत्नी रुजापहा ॥२२॥

रतिस्तुतिस्तुरा तुर्या तोतुला भववासिनी ।
तपःप्रिया शरच्छ्रेष्ठा पङ्गुपुत्री यमस्वसा ॥२३॥

यामी यमान्तका याम्या यमुना स्वर्नदी तड़ित् ।
नारायणी विश्वमाता भवानी पापनाशिनी ॥२४॥

विगता विगतप्रश्ना कृशा कृष्टासिधारिणी ।
वारी वारा वरधरा वरदी वीरसूदिनी ॥२५॥

वीरसूर्वामनाकारा दीर्घसत्रा दयावती ।
दरी धनप्रिया धात्री धात्रीवल्ली महोदरी ॥२६॥

गणेश्वरी गया काञ्ची काञ्चीकिङ्किणिघण्टिका ।
माया मायावती मत्ता प्रमत्ता प्रवरीश्वरी ॥२७॥

पौरन्दरी शची सीता शीतातपस्वभावजा ।
स्वाभाविकगुणा गण्या गाम्भीर्यगुणभूषणा ॥२८॥

सूतिः सूर्यकला सुप्ता सप्तसप्तिरूपिणी ।
तेजस्विनी सदानन्दा सभा सन्तोषवर्धिनी ॥२९॥

तर्पणा कर्षणा होता सङ्कल्पा शुभमात्रिका ।
दर्भा द्रोणिकला श्रान्ता समिधा सुरवेदिका ॥३०॥

धूम्राद्गतिश्चरमतिश्चामीकररुचिश्चिता ।
चिन्तानलेश्वरी नीला कालानिलसरस्वती ॥३१॥

अपर्णा सुफला यज्ञा सभया निर्भया वहा ।
भीमस्वना भर्गशिखा भास्वती भास्कराविभा ॥३२॥

विभावरी नदी नन्द्या नन्द्यावर्तप्रवर्तिनी ।
पृथ्वीधरा विषधरा विश्वगर्भा प्रवर्तिका ॥३३॥

विश्वमाया विश्वबाला विश्वम्भरविलासिनी ।
उरगेशा पद्मनागा पद्मनाभप्रसूः प्रजा ॥३४॥

तोरणा तुलसी दीक्षा दक्षा दाक्षायणी द्युतिः ।
सम्पुटा शयना शय्या शासना शमनान्तका ॥३५॥

श्यामा कवर्णा शार्दूली शष्पनीतांशुवल्लभा ।
स्तुत्या प्रणीता नियतिः कम्पना कम्पहारिणी ॥३६॥





चण्यका भाचरा चीना दीना दीनजनप्रिया ।
वसन्धुरा वासवेशी वसुनाथा वटेश्वरी ॥३७॥

समुद्रसङ्गमा पूर्णा तरला तरुवासिनी ।
पार्वती पासरी मान्या माननीया मधुप्रिया ॥३८॥

माधवी मधुपानस्था मन्दिरा मन्दुरा मृगी ।
मुमूषा रुरुषा रेवा रेवती रमणी रमा ॥३९॥

ऋद्धिहस्ता सिद्धिहस्ता अन्नपूर्णा महेश्वरी ।
अणुरूपा जगज्योतिः समस्तासुरघातिनी ॥४०॥

गारुड़ी गगनालम्बा लम्बमानकचप्रिया ।
पीताम्बरा पीतपुष्पा पूतना गातवल्लभा ॥४१॥

वलाका जगदन्ता च जरा जयवरप्रदा ।
प्रीतिः कठोर-वदना करालरदना रमा ॥४२॥

जिह्वा हस्ता च वगला प्रणया विनयप्रदा ।
कीरी करालवपुषी शेमुषी मक्षिका मुषा ॥४३॥

उत्तीर्णा उर्णिका तीक्ष्णा श्लक्ष्णा कामेश्वरी शिवा ।
शिवपत्नी सरोजाक्षी पद्महस्ता सरस्वती ॥४४॥

तथ्या पथ्यकृती रथ्या रथस्था विततासुरा ।
महती रागिनी मार्गी शुचिहासा हरीश्वरी ॥४५॥

हरिरत्नांशुलसिता लक्ष्मीनायकसुन्दरी ।
अम्बालिकाम्बा देवेशी अनगाग्निशिखाश्रुतिः ॥४६॥

अलसाल्पगतिश्चान्त्यानन्तानन्तगुणाश्रया ।
अयाचादित्यसंकाशा आदित्यकुलसुन्दरी ॥४७॥

आत्मरूपाधिशमनी आदिमायाधिदेवता ।
इन्द्रप्रसूरिनद्योतिरिनाग्निशिलोचना ॥४८॥

उमा उर्वी उरुभुजा उत्तुङ्गा चोक्षवाहना ।
उत्तङ्गा चोत्तमा ध्येया उल्लासा चोरुगर्विणी ॥४९॥

ऊष्मा उष्णा च गुर्वाङ्गी ऊर्ध्वाक्षी ऊर्ध्वमस्तिका ।
ऋद्धि ऋचा ऋवर्णेशी ऋणहर्त्री च वार्तकी ॥५०॥

ऋद्धिजा चारुवस्त्रा च ऋणिवासा महालसा ।
लृकारा लृक्कुरा लीला लृकारवरधारिणी ॥५१॥

ऐणाङ्कमुकुटा चेहा चारुचन्द्रकला कला ।
ऐंकारगतिरैश्वर्यदायिनी चेश्वरीगतिः ॥५२॥

ओंकारबीजरूपा च औत्रिकी बीजधारिणी ।
अम्बिका लम्पिकांपा च अःस्वरोद्गमरूपिणी ॥५३॥

काली च भद्रकाली च कालिका कालवल्लभा ।
कदम्बनिलया कन्था काञ्ची मण्डनमण्डिता ॥५४॥

कलङ्करहिता कुर्या काञ्चनाभाकरीरगा ।
कनकाम्लवासा च करुणा कुलमानसा ॥५५॥

कुलस्था कौलिनी कुल्या कुरुकुल्या कपालिनी ।
कपालकुलनिर्वाणा क्रींकारा कञ्जलोचना ॥५६॥

खञ्जनाक्षी खड्गधरा खेटकायुधभूषणा ।
गणाध्यक्षा गजगतिर्गणेश-जननी गदा ॥५७॥

गोधा गदाधरप्राज्या गगनेशी महीमला ।
घुर्घुरा घटभूर्घूका घुसृणाभा घनेश्वरी ॥५८॥

घनसारप्रिया साम्या घवर्णाक्षरभूषणा ।
चान्द्री चन्द्रस्तुता चार्वी चन्द्रिका चण्डनिःस्वना ॥५९॥

चञ्चरीकस्वना देवी चञ्चच्चामीकरी गदा ।
छत्रिकाच्छरिकाच्छुच्छा छत्रचामरभूषणा ॥६०॥





श्रींकारी जलजिह्वा च जृम्भिका जल्पयोगिनी ।
जटाजूटधरा जातिर्जातीपुष्पसमानना ॥६१॥

जलेश्वरी जगद्ध्येया जानकी जननी जटा ।
झंझाझरी झरत्कारी झरत्काञ्चीरकिङ्किणी ॥६२॥

झम्बिकाज्झम्पकृज्झम्पा पुत्रत्रासनिवारिणी ।
ञणुरूपाञवक्रहस्ता ञकाराक्षर सम्मता ॥६३॥

टङ्कायुधा महातथ्या टङ्कारा टरुणाटसी ।
ठकुठा ठक्कुरा ठानी डिढीरवसना डला ॥६४॥

ढण्डानिलमयी ढंढा ढणत्कारकराढसा ।
णान्तानना णीलायुधा णवर्णाक्षरभूषणा ॥६५॥

तरुणी तुन्दिला तोन्दा तामसी तामसप्रिया ।
ताम्रानना ताम्रकरा ताम्रांबरधरा तुला ॥६६॥

तापत्रयहरा तापी तैलासक्ता तिलोत्तमा ।
स्थाणुपत्नी स्थली स्थूला स्थितिः स्थैर्यधरास्थुला ॥६७॥

दन्तनी दन्तरा दर्वी देवका देवनायका ।
दमिनी शमनी दंढ्या दण्डहस्ता दुरानतिः ॥६८॥

दुर्वारा दुर्गतिद्राक्षा द्राक्षा द्रविडवासिनी ।
दूरस्था दुन्दुभिध्वाना दरदा दरनाशिनी ॥६९॥

दुःखघ्नी द्रनगा द्रष्टा दया दाम्भिक्यनाशिनी ।
धर्माधर्मप्रसूर्धन्या धनदा धातृवल्लभा ॥७०॥

धनुर्धरा धनुर्वल्ली धनुष्क-वरदायिनी ।
धूमाला धूम्रवदना धूमश्रीधूम्रलोचना ॥७१॥

नलिना नर्तकी नान्ता नङ्गा नलिनलोचना ।
निर्मला निगमाचारा निम्नगा नगजा निमिः ॥७२॥

नीलग्रीवा निरीहा च नीमोप-वन-वासिनी ।
निरञ्जनजनी जन्मा निद्रालुर्नीरवासिनी ॥७३॥

नटिनी नाट्यनिरता नवनीतप्रियानिला ।
नारायणी निराकारा निर्लेपा नित्यवल्लभा ॥७४॥

पद्मावती पद्मकरा पुत्रदा पुत्रवत्सला ।
पुरोत्तरा पुरी पाठा पीतश्रोत्रा पुलोमजा ॥७५॥

पुष्पिणी पुस्तककरा पटुपाठीरवाहना ।
पापघ्नी शम्पिनी पापी लोपकी परसुन्दरी ॥७६॥

पिशाची च पिशाचघ्नी पानपात्रधरापुटा ।
पूर्णिमा पञ्चमी पौत्री पुरूरववरप्रदा ॥७७॥

पञ्चयज्ञा पञ्चशरी पञ्चाशति मनुप्रिया ।
पाञ्चाली पञ्चपुत्रा च पूजा पूर्णमनोरथा ॥७८॥

फलिनी फलदात्री च फल्गुहस्ता फणिप्रिया ।
स्फिरङ्गहा स्फीतमतिः स्फीतिः स्फीतिमती स्फुटा ॥७९॥

बलमाया बलस्तुत्या विहसेना बलाबला ।
बगलेश्वरपूज्या च बलिनि बलवर्धिनी ॥८०॥

बुद्धमाता बौद्धमतिर्बद्धबन्धन-मोचिनी ।
भागिनी भगमाला च भगलिङ्गा मृतस्रवा ॥८१॥

भेमीश्वरी च भीरुण्डा भगेशी भगसर्पिणी ।
भगलिङ्गस्थिता भाग्या भाग्यदा भगमालिनी ॥८२॥

मत्ता मनोहरा मेना मैनाक-जननी सुरी ।
मुरली मानवी होत्री बहुस्विजनमोदिता ॥८३॥

मत्तमातङ्गगा माद्री मरालगतिरञ्चला ।
यज्ञेश्वरीश्वरी यक्षा यजुर्वेदप्रिया श्रुता ॥८४॥





यशोवती यतिस्था च यतात्मा यतिवल्लभा ।
यवनी यौवनस्था च यवा यक्षजनाश्रया ॥८५॥

यज्ञसूत्रप्रदा ज्येष्ठा यत्रभूर्धूपमूलिनी ।
रञ्जिता राजपत्नी च राजसूर्यफलप्रदा ॥८६॥

रजोवती रजश्चित्रा राज्यदा राज्यवर्द्धिनी ।
राज्ञी रात्रिंचरेशानी रोगघ्नी त्रिपुरेश्वरी ॥८७॥

ललिता लतिका लाप्या लोपा ललनलालसा ।
लाटीरद्रुमवासा च पाटीरद्रुमवर्तिनी ॥८८॥

लङ्का ललज्जटजूटा जङ्किता सुरसुन्दरी ।
लोकेश्वरदा लीना लयकर्त्री महालया ॥८९॥

वेदिर्विमग्ना वाणी च वेणावेणुवनेश्वरी ।
वन्दमानाववर्णाढ्या वाराही वीरमातृका ॥९०॥

शङ्खिनी शङ्खवलया शङ्खायुधधराशमा ।
शशिमण्डलमध्यस्था शीतलाम्बुनिवासिनी ॥९१॥

श्मशानस्था महाघोरा श्मशाननिलयेश्वरी ।
सिन्धुः सूत्रधरा सत्रः समस्तकुलचारिणी ॥९२॥

सप्तमी सात्त्विकी सत्त्वा सूत्रस्था सुरसूदिनी ।
सुरेश्वरी सम्प्रदाद्या समस्थाचलचारिणी ॥९३॥

समदा समितिः सस्मा सवना सवनेश्वरी ।
हंसी हरप्रिया हास्या हरिनेत्रा हराम्बिका ॥९४॥

हेषा हटेश्वरी हीरा हलिनी फलदायिनी ।
हेहा हाहारववला हालाहलहताशया ॥९५॥

क्षमा क्षेमप्रदा क्षामा क्षौमाम्बरधराक्षया ।
क्षितिः क्षीरप्रिया लक्ष्मीः क्षितिभृत् तुलया क्षुधा ॥९६॥

क्षत्रियी ब्राह्मणी क्षेत्रा क्षपा क्षाबीजमण्डिता ।
लक्षा बीजस्वरूपा च क्षकाराक्षरमातृका ॥९७॥

दुर्गन्धनाशिनी दुर्वा दुर्गमा दुर्गनाशिनी ।
दुर्गा दुर्गार्तिनाशिनी ओंह्लींदुंबीजमण्डिता ॥९८॥

इति नामसहस्रं तु मन्त्रगर्भं महाबलम् ।
दुर्गा यद्दुर्गतिहरं सर्वदेवनमस्कृतम् ॥९९॥

सर्वमन्त्रमयं दिव्यं देवदानवपूजितम् ।
श्रेयस्करं महापुण्यं महापातकनाशनम् ॥१००॥

यः पठेत्पाठयेद्वापि शृणोति श्रावयेदपि ।
स महापातकैर्मुक्तो देवदानवसेवितः ॥१०१॥

इह लोके श्रियं भुक्त्वा परत्र त्रिदिवं व्रजेत् ।
दुर्गानामसहस्रं तु मूलमन्त्रैकसाधनम् ॥१०२॥

अर्धरात्रे पठेद् वीरो मधुरस्मयसेवितः ।
त्रिवारं वर्मपूर्वन्तु भवेद् वागीशसन्निभः ॥१०३॥

यः पठेद् देवि ! मध्याह्ने स्त्रीयुतो मुक्तकुन्तलः ।
तस्य वैरिकुलं त्रस्येन्यसूर्दि चैव दर्शनात् ॥१०४॥

इहनादिव देवेशि ! पतङ्गकुलमद्रिजे ।
यः पठेद् वेतसीमूले सायं पूजितभैरवः ॥१०५॥

तस्यास्यकुहराद् वाणी निःसरेद् गद्यपद्यभाक् ।
यः पठेत् सततं देवि ! शयने स्त्रीरताकुलः ॥१०६॥

स भवेद् वैरिविध्वंसी धनेन धनदोपमः ।
वाग्भिर्वागीशसदृशः कवित्वेन सितोपमः ॥१०७॥

तेजसा सूर्यसंकाशो यशसा सूर्यसन्निभः ।
बलेन वायुतुल्योऽपि लक्ष्म्या गीर्वाणनायकः ॥१०८॥





देवि ! किं बहुनोक्तेन स भवेद् भैरवोपमः ।
स्तम्भनाकर्षणोच्चाटवशीकरणकक्षमः ॥१०९॥

रवौ भूर्जे लिखेद् देवि ! निशीथे चाष्टगन्धकैः ।
स स्तम्भरेतो राजस्कैः साधको मन्त्रसाधकः ॥११०॥

लिखित्वा वेष्टयन् नामसहस्रमणिमीश्वरी ।
श्वेतसूत्रेण सम्वेष्ट्य लाक्षया परिवेष्टयेत् ॥१११॥

सुवर्णरजताद्यैश्च वेष्टयेत्पीतसूत्रकैः ।
सम्पूज्य गुटिकां देवि ! शुभेऽह्नि साधकोत्तमः ॥११२॥

धारयेन्मूर्ध्नि वा बाहौ गुटिकां कामदायिनीम् ।
रणे रिपून् विजित्याशु कल्याणि ! गृहमाविशेत् ॥११३॥

वन्ध्या वाम-भुजे धृत्वा कृत्वा साधकपूजनम् ।
पुत्रान् लभेन्महादेवि ! साक्षाद् वैश्रवणोपमान् ॥११४॥

गुटिकैषा महादिव्या गोप्या कामफलप्रदा ।
साधकैः सततं पूज्या साक्षाद् दुर्गास्वरूपिणी ॥११५॥

योऽर्चयेत्साधको दुर्गागुटिकां धारयेत् प्रिये ।
पठेद् वर्मशिवे मन्त्रं नाम साहस्रिकं परम् ॥११६॥

अङ्गस्तोत्रं फलं तस्य देवि ! वक्ष्येऽधुना शृणु ।
वने राजकुले वापि दुर्भिक्षे शत्रुसङ्कटे ॥११७॥

वधे यक्ष-पिशाचादि-भूत-प्रेत-भये तथा ।
वीरो विगतभेर्देवि ! सर्वत्र विजयी भवेत् ॥११८॥

स्तम्भयेद् वायुसूर्यं च चन्द्रादीन् साधकोत्तमः ।
मोहयेत् त्रिजगत्सद्यः कान्ताश्चाकर्षयेत् ध्रुवम् ॥११९॥

मारयेदखिलान् शत्रूनुच्चाटयति वैरिणः ।
वशयेद् देवता सद्यः किं पुनर्मायया शिवे ॥१२०॥

शमयेदखिलान् रोगान् महोत्पातानुपद्रवान् ।
किंकि न लभते वीरो दुर्गापञ्चाङ्गपूजनात् ॥१२१॥

इदं रहस्यं दुर्गायाः अष्टाक्षर्या महेश्वरी ।
सर्वस्वं सारतत्त्वं च मूलविद्यामयं परम् ॥१२२॥

महाचीनक्रमस्थानां साधकानां यशस्करम् ।
पठेत्संपूजयेद् देव्या मन्त्रनामसहस्रकम् ॥१२३॥

इदं सारं हि तन्त्राणां तत्त्वानां तत्त्वमुत्तमम् ।
दुर्गानामसहस्रं तु तव भक्त्या प्रकाशितम् ॥१२४॥

अभक्ताय न दातव्यं गोप्तव्यं पशुसन्निधौ ।
अभक्तेभ्योऽपि पुत्रेभ्यो दत्त्वा नरकमाप्नुयात् ॥१२५॥

दीक्षिताय कुलीनाय गुरुभक्तिरताय च ।
शान्ताय भक्तियुक्ताय देयं नामसहस्रकम् ॥१२६॥

विना दानं न गृह्णीयान्न दद्याद् दक्षिणां विना ।
दत्त्वा गृहीत्वात्युभयोः सिद्धिहानिर्भवेद् ध्रुवम् ॥१२७॥

इदं नामसहस्रं तु गुप्तगोप्यतमं शिवे ।
तव भक्त्या मयाख्यातं गोपनीय स्वयोनिवत् ॥१२८॥

इति श्रीरुद्रयामले तन्त्रे देवीरहस्ये दुर्गासहस्रनामाख्यं स्तोत्रं समाप्तम् ।

■



## श्रीगंगा-सहस्रनामावली

अथ ध्यानम्

सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां
करधृतकलशोद्यत्सोत्पलामीत्यभीष्टाम् ॥
विधिहरिहररूपां सेन्दुकोटीरजूटां
कलितसितदुकूलां जाह्नवीं तां नमामि ॥१॥

ॐ ओंकाररूपिण्यै नमः, अजरायै नमः, अतुलायै नमः ।
अनन्तायै नमः, अमृतस्रवायै नमः, अत्युदारायै नमः ।
अभयायै नमः, अशोकायै नमः, अलकनन्दायै नमः ।
अमृतायै नमः, अमलायै नमः, अनाथवत्सलायै नमः ।
अमोघायै०, अपां योनये०, अमृतप्रदायै नमः, अव्यक्तलक्षणायै० ।
अक्षोभ्यायै नमः, अनवच्छिन्नायै नमः, अपरायै नमः ।
अजितायै नमः, अनाथनाथायै नमः, अभीष्टार्थसिद्धिदायै० ।
अनङ्गवर्धिन्यै नमः, अणिमादिगुणायै नमः, आधारायै नमः ।
अग्रगण्यायै नमः, अलीकहारिण्यै नमः, अचिन्त्यशक्तये नमः ।
अनघायै नमः, अद्भुतरूपायै नमः, अघहारिण्यै नमः ।
अद्रिराजसुतायै नमः, अष्टाङ्गयोगसिद्धिप्रदायै०, अच्युतायै नमः ।
अक्षुण्णशक्तये नमः, असुदायै नमः, अनन्ततीर्थायै नमः ।
अमृतोदकायै नमः, अनन्तमहिम्ने नमः, अपारायै नमः ।
अनन्तसौख्यप्रदायै०, अन्नदायै नमः, अशेषदेवतामूर्तये नमः ।
अघोरायै नमः, अमृतरूपिण्यै नमः, अविद्याजालशमन्यै० ।
अप्रतर्क्यगतिप्रदायै०, अशेषविघ्नसंहर्त्र्यै नमः, अशेषगुणगुम्फितायै०
अज्ञानतिमिरज्योतिषे०, अनुग्रहपरायणायै नमः, अभिरामायै नमः ।

अनवद्यांग्यै नमः, अनन्तसारायै नमः, अकलङ्किन्यै नमः ।
आरोग्यदायै नमः, आनन्दवल्ल्यै नमः, आपन्नार्तिविनाशिन्यै०
आश्चर्यमूर्तये नमः, आयुष्यायै नमः, आढ्यायै नमः ।
आद्यायै नमः, आप्रायै नमः, आर्यसेवितायै नमः ।
आप्यायिन्यै नमः, आप्तविद्यायै नमः, आख्यायै नमः ।
आनन्दायै नमः, आश्वासदायिन्यै नमः, आलस्यघ्न्यै नमः ।
आपदाहन्त्र्यै नमः, आनन्दामृतवर्षिण्यै०, इरावत्यै नमः ।
इष्टदात्र्यै नमः, इष्टायै नमः, इष्टापूर्तफलप्रदायै नमः ।
इतिहासश्रुतीड्यर्थायै०, इहामुत्रशुभप्रदायै नमः ।
इज्याशीलसमिज्येष्ठायै०, इन्द्रादिपरिवन्दितायै० ।
इलालङ्कारमालायै नमः, इद्धायै नमः, इन्दिरारम्यमन्दिरायै०
इते नमः, इन्दिरादिसंसेव्यायै०, ईश्वर्यै नमः, ।
ईश्वरवल्लभायै नमः, ईतिभीतिहरायै नमः, ईड्यायै नमः ।
ईडनीयचरित्रभृते नमः, उत्कृष्टशक्तये नमः ।
उत्कृष्टायै नमः, उडुपमण्डलचारिण्यै०
उदिताम्बरमार्गायै नमः, उस्रायै ममः, उरगलोकविहारिण्यै०
उक्षायै नमः, उर्वरायै नमः, उत्पलायै नमः, उत्कुम्भायै नमः ।
उपेन्द्रचरणद्रवायै०, उदन्वत्पूर्तिहेतवे नमः, उदारायै नमः ।
उत्साहप्रवर्धिन्यै नमः, उद्वेगघ्न्यै नमः, उष्णशमन्यै नमः ।
उष्णरश्मिसुताप्रियायै०, उत्पत्तिस्थितिसंहारकारिण्यै नमः ।
उपरिचारिण्यै नमः, ऊर्जंवहन्त्यै नमः, ऊर्जंधरायै नमः ।
ऊर्जावत्यै नमः, ऊर्मिमालिन्यै नमः ऊर्ध्वरेतःप्रियायै नमः ।
ऊर्ध्वाध्वायै नमः, ऊर्मिलायै नमः, ऊर्ध्वगतिप्रदायै नमः ।
ऋषिवृन्दस्तुतायै नमः, ऋद्धये नमः, ऋणत्रयविनाशिन्यै०





ऋतंभरायै नमः, ऋद्धिदात्र्यै नमः, ऋक्स्वरूपायै नमः ।
ऋजुप्रियायै नमः ऋक्षमार्गवहायै नमः ऋक्षार्चिषे नमः ।
ऋजुमार्गप्रदर्शिन्यै०, एधिताखिलधर्मार्थायै०, एकस्यै नमः ।
एकामृतदायिन्यै नमः, एधनीयस्वभावायै०, एज्यायै नमः ।
एजिताशेषपातकायै०, ऐश्वर्यदायै नमः, ऐश्वर्यरूपायै नमः ।
ऐतिह्यायै नमः, ऐन्दवद्युतये नमः, ओजस्विन्यै नमः ।
ओषधीक्षेत्रायै नमः, ओजोदायै नमः, ओदनदायिन्यै नमः ।
ओष्ठामृतायै नमः, औन्नत्यदात्र्यै नमः, भवरोगिणामौषधायै०
औदार्यचञ्चुरायै नमः, औपेन्द्रायै नमः औग्र्यै नमः ।
औमेयरूपिण्यै नमः, अम्बराध्ववहायै नमः, अम्बाष्ठायै नमः ।
अम्बरमालायै नमः, अम्बुजेक्षणायै नमः, अम्बिकायै नमः ।
अम्बुमहायोनये नमः, अन्धोदायै नमः, अन्धकहारिण्यै नमः ।
अंशुमालायै नमः, अंशुमत्यै नमः, अङ्गीकृतषडाननायै०
अन्धतामिस्रहन्त्र्यै०, अन्धवे नमः, अञ्जनायै नमः ।
अञ्जनावत्यै नमः, कल्याणकारिण्यै०, काम्यायै नमः ।
कमलोत्पलगन्धिन्यै०, कुमुद्वत्यै नमः, कमलिन्यै नमः ।
कान्तायै नमः, कल्पितदायिन्यै नमः, काञ्चनाक्ष्यै नमः ।
कामधेनवे नमः, कीर्तिकृते नमः, क्लेशनाशिन्यै नमः ।
क्रतुश्रेष्ठायै नमः, क्रतुफलायै नमः, कर्मबन्धविभेदिन्यै०
कमलाक्ष्यै नमः, क्लमहरायै नमः, कृशानुतपनद्युतये नमः ॥
करुणार्द्रायै नमः कल्याण्यै नमः, कलिकल्मषनाशिन्यै०
कामरूपायै नमः, क्रियाशक्त्यै नमः, कमलोत्पलमालिन्यै०
कूटस्थायै नमः, करुणायै नमः, कान्तायै नमः ।
कूर्मयानायै नमः, कलावत्यै नमः, कमलायै नमः ।

कल्पलतिकायै नमः, काल्यै नमः, कलुषवैरिण्यै नम ।
कमनीयजलायै नमः, कम्रायै नमः, कपर्दिसुकपर्दगायै नमः ।
कालकूटप्रशमन्यै नमः, कदम्बकुसुमप्रियायै०, कालिन्द्यै नमः ।
केलिललितायै नमः कलकल्लोलमालिकायै० ।
क्रान्तलोकत्रयायै नम, कण्ड्वै नमः, कण्डूतनयवत्सलायै०
खड्गिन्यै नमः, खड्गधाराभायै नमः, खगायै नमः ।
खण्डेदुधारिण्यै नमः, खेखेलगामिन्यै नमः, स्वस्थायै नमः ।
खण्डेन्दुतिलकप्रियायै, खेचर्यै नमः, खेचरीवन्द्यायै नमः ।
ख्यात्यै नमः, ख्यातिप्रदायिन्यै०, खण्डितप्रणताघौघायै० ।
खलबुद्धिविनाशिन्यै० खातैनःकन्दसन्दोहायै ० ।
खड्गखट्वाङ्गखेटिन्यै०, खरसन्तापशमन्यै० ।
पीयूषपाथसाखनये०; गङ्गायै नमः, गन्धवत्यै नमः, गौर्यै नमः ।
गन्धर्वनगरप्रियायै०, गम्भीराङ्ग्यै नमः, गुणमय्यै नमः ।
गतातङ्कायै नमः, गतिप्रियायै नमः, गणनाथाम्बिकायै० ।
गीतायै नमः, गद्यपद्यपरिष्टुतायै०, गान्धार्यै नमः
गर्भशमन्यै नमः गतिभ्रष्टगतिप्रदायै०, गोमत्यै नमः ।
गुह्यविद्यायै नमः, गवे नमः, गोप्त्र्यै नमः ।
गगनगामिन्यै नमः, गोत्रप्रवर्धिन्यै नमः ।
गुण्यायै नमः, गुणातीतायै नमः, गुणाग्रण्यै नमः ।
गुहाम्बिकायै नमः, गिरिसुतायै नमः ।
गोविन्दाङ्घ्रिसमुद्भवायै नमः, गुणनीयचरित्रायै नमः ।
गायत्र्यै नमः, गिरीशप्रियायै नमः, गूढरूपायै नमः ।
गुणवत्यै नमः, गुर्व्यै नमः, गौरववर्धिन्यै नमः ।
ग्रहपीड़ाहरायै नमः, गुन्द्रायै नमः, गरघ्न्यै नमः ।





गानवत्सलायै नमः, घर्महन्त्र्यै नमः, घृतवत्यै नमः ।
घृततुष्टिप्रदायिन्यै०, घण्टारवप्रियायै नमः ।
घोरघौघविध्वंसकारिण्यै नमः, घ्राणतुष्टिकर्यै नमः, घोषायै नमः ।
घनानन्दायै नमः, घनप्रियायै नमः, घातुकायै नमः ।
घूर्णितजलायै नमः, घृष्टपातकसन्तत्यै नमः ।
घटकोटिप्रपीतापायै०, घटिताशेषमङ्गलायै०, घृणावत्यै नमः ।
घृणनिधये नमः, घस्मरायै नमः, घूकनादिन्यै नमः ।
घुसृणापिञ्जरतनवे०, घर्घरायै नमः ।
घर्घरस्वनायै नमः, चन्द्रिकायै नम., चन्द्रकांताम्बुवे नमः ।
चञ्चदापायै नमः, चकद्युतये नमः, चिन्मय्यै नमः ।
चितिरूपायै नमः, चन्द्रायुतशताननायै चाम्पेयलोचनायै नमः ।
चारवे नमः, चार्वंग्यै नमः, चारुगामिन्यै, नमः ।
चार्यायै नमः, चारित्रनिलयायै नमः, चित्रकृते नमः ।
चित्ररूपिण्यै नमः, चम्प्वै नमः चन्दनशुच्यम्बुवे नमः ।
चर्चनीयायै नमः, चिरस्थिरायै नमः, चारुचम्पकमाढ्यायै नमः ।
चमिताशेषदुष्कृतायै०, चिदाकाशवहायै नमः, चिन्त्यायै नमः ।
चञ्चते नमः, चामरवीजितायै नमः, चोरिताशेषवृजिनायै०
चरिताशेषमण्डलायै०, छेदिताखिलपापौघायै नमः ।
छद्मघ्न्यै नमः, छलहारिण्यै नमः, छन्नत्रिविष्टपतलायै०
छोटिताशेषबन्धनायै०, छुरितामृतधारौघायै०, छिन्नैनसे नमः ।
छन्दगामिन्यै नमः, छत्रीकृतमरालौघायै०
छटीकृतनिजामृतायै०, जाह्नव्यै नमः, ज्यायै नमः ।
जगन्मात्रे नमः, जप्यायै नमः, जङ्घालवीचिकायै०
जयायै नमः, जनार्दनप्रीतायै नमः, जुषणीयायै नमः ।

जगद्धितायै नमः, जीवनायै नमः, जीवनप्राणायै नमः।
जगते नमः, ज्येष्ठायै नमः, अस्मय्यै नमः, जीवजीवातुलतिकायै०
जन्मिजन्मनिबर्हिण्यै०, जाड्यविध्वंसनकर्यै०, जगद्योनये नमः।
जलाविलायै नमः, जगदानन्दजनन्यै०, जलजायै नमः।
जलजेक्षणायै नमः, जनलोचनपीयूषायै०, जटातटविहारिण्यै०।
जयन्त्यै नमः, जह्नुपूकघ्न्यै नमः, जनितज्ञानविग्रहायै०
झल्लरीवाद्यकुशलायै०, झलज्झालजलावृतायै नमः।
झिण्टीशवन्द्यायै नमः, झाङ्कारकारिण्यै नमः, झर्झरावत्यै नमः।
टिकिताशेषपातालायै०, एनोद्रिपाटने टङ्किकायै नमः।
टङ्कारनृत्यत्कल्लोलायै०, टीकनीयहातटायै०, डम्बरप्रवहायै नमः
डीनराजहंसकुलाकुलायै नमः, डमड्डमरुहस्तायै०
डामरोक्तमहाण्डकायै नमः, ढौकिताशेषनिर्वाणायै०
ढक्कानादचलज्जलायै० ढुण्ढिविघ्नेशजनन्यै०, ढणढ्ढुणितपातकायै०
तर्पण्यै नमः, तीर्थतीर्थायै नमः, त्रिपथायै नमः।
त्रिदशेश्वर्यै नमः, त्रिलोकगोप्त्र्यै नमः, तोयेश्यै नमः।
त्रैलोक्यपरिवन्दितायै०, तापत्रितयसंहर्त्र्यै नमः।
तेजोबलवर्धिन्यै नमः, त्रिलक्ष्यायै नमः, तारिण्यै नमः।
तारायै नमः, तारापतिकराचितायै०, त्रैलोक्यपावनीपुण्यायै नमः।
तुष्टिदायै नमः, तुष्टिरूपिण्यै नमः, तृष्णाछेत्र्यै नमः।
तीर्थमात्रे नमः, त्रिविक्रमपदोद्भूवायै०, तपोमय्यै नमः।
तपोरूपायै नमः, तपस्तोमफलप्रदायै०, त्रैलोक्यव्यापिन्यै०
तृप्त्यै नमः, तृप्तिकृते नमः, तत्त्वरूपिण्यै नमः।
त्रैलोक्यसुन्दर्यै नमः, तुर्यायै नमः, तुर्यातीतपदप्रदायै०
त्रैलोक्यलक्ष्म्यै नमः, त्रिपद्यै नमः, तथ्यायै नमः।





तिमिरचन्द्रिकायै नमः, तेजोगर्भायै नमः, तपःसारायै नमः।
त्रिपुरारिशिरोगृहायै०, त्रयीस्वरूपिण्यै नमः, तन्व्यै नमः।
तपनाङ्गभीतिनुदे०, तरये नमः, तरणिजामित्रायै नमः।
तर्पिताशेषपूर्वजायै०, तुलाविरहितायै नमः।
तीव्रपापतूलतनूनपाते०, दारिद्र्यदमन्यै नमः, दक्षायै नमः।
दुष्प्रेक्षायै नमः, दिव्यमण्डनायै नमः, दीक्षावत्यै नमः।
दुरावाप्यायै नमः, द्राक्षामधुरवारिभृते०, दर्शितानेककुतुकायै०
दुष्टदुर्जयदुःखहृते नमः, दैन्यहृते नमः, दुरितघ्न्यै नमः।
दानवारिपदाब्जजायै०, दन्दशूकविषघ्न्यै नमः।
दानवारिपदाब्जजायै०, दन्दशूकविषघ्न्यै नमः।
दारिताघौघसन्तत्यै०, द्रुतायै नमः, देवद्रुमच्छन्नायै नमः।
दुर्वाराघविघातिन्यै०, दमग्राह्यायै नमः, देवमात्रे नमः।
देवलोकप्रदर्शिन्यै नमः, देवदेवप्रियायै नमः, देव्यै नमः।
दिक्पालपददायिन्यै०, दीर्घायुष्कारिण्यै नमः, दीर्घायै नमः।
दोग्ध्र्यै नमः, दूषणवर्जितायै नमः, दुग्धाम्बुवाहिन्यै नमः।
दोह्यायै नमः, दिव्यायै नमः, दिव्यगतिप्रदायै नमः।
द्युनद्यै नमः, दीनशरणायै नमः, देहिदेहनिवारिण्यै०
द्राघीयस्यै नमः, दाहहन्त्र्यै नमः, दितपातकसन्तत्यै०
दूरदेशान्तरचर्यै नमः, दुर्गमायै नमः, देवल्लभायै नमः।
दुर्वृत्तघ्न्यै नमः, दुर्विगाह्यै नमः, दयाधारायै नमः।
दयावत्यै नमः, द्रुहिणस्तुतायै नमः, दैत्यदानवसंशुद्धि-
कर्त्र्यै नमः, दुर्बुद्धिहारिण्यै नमः, दानसारायै नमः।
दयासारायै नमः, द्यावभूमावगाहिन्यै० दृष्टादृष्टफलप्राप्त्यै०
देवतावृन्दवन्दितायै०, दीर्घव्रतायै नमः, दीर्घदृष्ट्यै नमः।

दीप्ततोयायै नमः, दुरालभायै नमः, दण्डयित्र्यै नमः ।
दण्डनीतये नमः, दुष्टदण्डधरार्चितायै०, दुरोदरघ्न्यै नमः ।
दावार्चिषे नमः, द्रवते नमः, द्रव्यैकशेवधये नमः ।
दीनसन्तापशमन्यै०, दात्र्यै नमः, दवथुवैरिण्यै नमः ।
दारितादितटायै नमः, दुर्गायै नमः, दुर्गारण्यप्रचारिण्यै०
धर्मद्रवाये नमः, धर्मधुरायै नमः, धेनवे नमः, धीरायै नमः ।
धर्मद्रवायै नमः, धर्मधुरायै नमः, धेनवे नमः, धीरायै नमः ।
धृतये नमः, ध्रुवायै नमः, धेनूदानफलस्पर्शायै ।
धर्मकामार्थमोक्षदायै, धर्मोर्मिवाहिन्यै नमः, धुर्यायै नमः ।
धात्र्यै नमः, धात्रीविभूषणायै नमः, धर्मिण्यै नमः ।
धर्मशीलायै नमः, धन्विकोटिकृतावनायै नमः ।
ध्यातृपापहरायै नमः, ध्येयायै नमः, धावन्यै नमः ।
धूतकल्मषायै नमः, धर्मधारायै नमः, धर्मसारायै नमः ।
धनदायै नमः, धनवर्धिन्यै नमः, धर्माधर्मगुणच्छेत्र्यै०
धत्तूरकुसुमप्रियायै०, धर्मेश्यै नमः, धर्मशास्त्रज्ञायै नमः ।
धनधान्यसमृद्धिकृते०, धर्मलभ्यायै नमः, धर्मजलायै नमः ।
धर्मप्रसवधर्मिण्यै०, ध्यानगम्यस्वरूपायै०, धरण्यै नमः ।
धातृपूजितायै नमः, धुरे नमः, धूर्जटिजटासंस्थायै०, धन्यायै नमः ।
धिये नमः, धारणावत्यै नमः, नन्दायै नमः ।
निर्वाणजनन्यै नमः, नन्दिन्यै नमः, नुन्नपातकायै नमः ।
निषिद्धविघ्ननिचयायै नमः, निजानन्दप्रकाशिन्यै० ।
नभोङ्गणचर्यै नमः, नूतये नमः, नम्यायै नमः, नारायण्यै नमः ।
नुतायै नमः, निर्मलायै नमः, निर्मलाख्यानायै नमः ।
तापसापदांनाशिन्यै०, नियतायै नमः, नित्यसुखदायै नमः ।





नानाश्चर्यमहानिधये०, नद्यै नमः, नदसरोमात्रे नमः ।
नायिकायै नमः, नाकदीर्घिकायै नमः, नष्टोद्धरणधीरायै नमः ।
नन्दनायै नमः, नन्ददायिन्यै नमः, निर्णिक्ताशेषभुवनायै०
निस्सङ्गायै नमः, निरुपद्रवायै नमः, निरालम्बायै नमः ।
निष्प्रपचायै नमः, निर्णाशितमहामलायै, निर्मलज्ञानजनन्यै०
निश्शेषप्राणितापहृते०, नित्योत्सवायै नमः, नित्यतृप्तायै नमः ।
नमस्कार्यायै नमः, निरञ्जनायै नमः, निष्ठावत्यै नमः ।
निरातङ्कायै नमः, निर्लेपायै नमः, निश्चलात्मिकायै० ।
निरवद्यायै नमः, निरीहायै नमः, नीललोहितमूर्धगायै०,
नन्दिभृङ्गिगणस्तुत्यायै नमः, नागायै नमः, नन्दायै नमः ।
नगात्मजायै नमः, निष्प्रत्यूहायै नमः, नाकनद्यै नमः ।
निरयार्णवदीर्घनावे०, पुण्यप्रदायै नमः, पुण्यगर्भायै नमः ।
पुण्यायै नमः, पुण्यतरङ्गिण्यै नमः, पृथवे नमः, पृथुफलाय नमः ।
पूर्णायै नमः, प्रणतार्तिप्रभञ्जिन्यै०, प्राणदायै नमः ।
प्राणिजनन्यै नमः, प्राणेश्यै नमः, प्राणरूपिण्यै नमः ।
पद्मालयायै नमः, पराशक्त्यै नमः, पुराजित्परमप्रियायै०
परायै नमः, परफलप्राप्त्यै नमः, पावन्यै नमः, पयस्विन्यै नमः ।
पशुनन्दायै नमः, प्रकृष्टार्थायै नमः, प्रतिष्ठायै नमः, पालिन्यै० नमः
परायै नमः, पुराणपठितायै नमः, प्रीतायै नमः, प्रणवाक्षररूपिण्यै
पार्वत्यै नमः, प्रेमसम्पन्नायै नमः, पशुपाशविमोचिन्यै० ।
परमात्मस्वरूपायै०, परब्रह्मप्रकाशिन्यै नमः, परमानन्दनिष्पन्दायै०
प्रायश्चित्तस्वरूपिण्यै०, पानीयरूपनिर्वाणायै०, परित्राणपरायणायै०
पापेन्धनदवज्वालायै०, पापारये नमः, पापनामनुदे नमः ।
परमैश्वर्यजनन्यै नमः, प्रज्ञायै नमः, परापरायै नमः ।

प्रत्यक्षलक्ष्म्यै नमः, पद्माक्ष्यै नमः, परव्योमामृतस्रवायै०
प्रसन्नरूपायै नमः, प्रणिधये नमः, पूतायै नमः ।
प्रत्यक्षदेवतायै नमः, पिनाकिपरमप्रीतायै०, परमेष्ठिकमण्डल्वे०
पद्मनाभपदार्घ्येण प्रसूतायै नमः, पद्ममालिन्यै नमः ।
परर्धिदायै नमः, पुष्टिकर्त्र्यै नमः, पथ्यायै नमः, पूर्तये नमः ।
प्रभावत्यै नमः, पुनानायै नमः ।
पीतागर्भघ्न्यै नमः, पापपर्वतनाशिन्यै०, फलिन्यै नमः ।
फलहस्तायै नमः, फुल्लाम्बुजविलोचनायै नमः, फालितैनोमहा-
क्षेत्रायै नमः, फणिलोकविभूषणायै नमः, फेनच्छलप्रणुन्नैनसने०
फुल्लकैरवगन्धिन्यै०, फेनिलाच्छाम्बुधाराभायै नमः ।
फुडुच्चाटितपातकायै०, फाणितस्वादुसलिलायै नमः ।
फाण्टपथ्यजलाविलायै नमः, विश्वमात्रे नमः, विश्वेश्यै नमः ।
विश्वस्यै नमः, विश्वेश्वरप्रियायै०, ब्रह्मण्यायै नमः ।
ब्रह्मकृते नमः, ब्राह्म्यै नमः, ब्रह्मिष्ठायै नमः; विमलोदकायै नमः
विभावर्यै नमः, विरजायै नमः, विक्रान्तानेकविष्टपायै नमः ।
विश्वामित्रायै नमः, विष्णुपद्यै नमः, वैष्णव्यै नमः ।
वैष्णवप्रियायै नमः, विरूपाक्षप्रियकर्यै०, विभूतये नमः ।
विश्वतोमुख्यै नमः, विपाशायै नमः, वैबुध्यै नमः, वैद्यायै नम ।
वेदाक्षररसस्रवायै०, विद्यायै नमः, वेगवत्यै नमः, वन्द्यायै नमः ।
बृंहिण्यै नमः, ब्रह्मवादिन्यै नमः, वरदायै नमः, विप्रकृष्टायै नमः॥
वरिष्ठायै नमः, विशोधिन्यै नमः, विद्याधर्यै नमः, विशोकायै नमः
वयोवृन्दनिषेवितायै०, बहूदकायै नमः, बलवत्यै नमः ।
व्योमस्थायै नमः, विबुधप्रियायै नमः, वाण्यै नमः, वेदवत्यै नमः ।
वित्तायै नमः, ब्रह्मविद्यातरङ्गिण्यै०, ब्रह्माण्डकोटिव्याप्ताम्बवे नमः





ब्रह्महत्यापहारिण्यै०, ब्रह्मेशविष्णुरूपायै०, बुद्धये नमः ।
विभववर्धिन्यै नमः, विलासिसुखदायै नमः, वश्यायै नमः ।
व्यापिन्यै नमः, वृषारण्यै नमः, वृषाङ्कमौलिनिलयायै० ।
विपन्नार्तिप्रभञ्जिन्यै०, विनीतायै नमः, विनतायै नमः ।
ब्रध्नतनयायै नमः, विनयान्वितायै नमः, विपञ्च्यै नमः ।
वाद्यकुशलायै नमः, वेणुश्रुतिविचक्षणायै०, वर्चस्कर्यै नमः ।
बलकर्यै नमः, बलोन्मूलितकल्मषायै०, विपाप्मने नमः ।
विगतातङ्कायै नमः, विकल्पपरिवर्जितायै०, वृष्टिकर्त्र्यै नमः ।
वृष्टिजलायै नमः, विधये नमः, विच्छिन्नबन्धनायै० ।
व्रतरूपायै नमः, वित्तरूपायै नमः, बहुविघ्नविनाशकृते० ।
वसुधारायै नमः, वसुमत्यै नमः, विचित्राङ्ग्यै नमः ।
विभावसवे नमः, विजयायै नमः, विश्वबीजायै नमः ।
वामदेव्यै नमः, वरप्रदायै नमः, वृषाश्रितायै नमः ।
विषघ्न्यै नमः, विज्ञानोर्म्यंशुमालिन्यै नमः, भव्यायै नमः ।
भोगवत्यै नमः भद्रायै नमः, भवान्यै नमः, भूतभाविन्यै नमः ।
भूतधात्र्यै नमः, भयहरायै नमः, भक्तदारिद्र्यघातिन्यै० ।
भुक्तिमुक्तिप्रदायै०, भेश्यै नमः, भक्तस्वर्गापवर्गदायै० ।
भागीरथ्यै नमः, भानुमत्यै नमः, भाग्यायै नमः, भोगवत्यै नमः ।
भूतये नमः, भवप्रियायै नमः, भवद्वेष्ट्र्यै नमः, भूतिदायै नमः ।
भूतिभूषणायै नमः, भाललोचनभावज्ञायै० ।
भूतभव्यभवत्प्रभवे०, भ्रान्तिज्ञानप्रशमिन्यै नमः ।
भिन्नब्रह्माण्डमण्डपायै नमः, भूरिदायै नमः, भक्तिसुलभायै नमः ।
भाग्यवद्दृष्टिगोचर्यै०, भञ्जितोपप्लवकुलायै० ।
भक्ष्याभोज्यसुखप्रदायै०, भिक्षणियायै नमः, भिक्षुमात्रे नमः ।

भावायै नमः, भावस्वरूपिण्यै नमः, मन्दाकिन्यै नमः।
महानन्दायै नमः, मात्रे नमः, मुक्तितरङ्गिण्यै नमः।
महोदयायै नमः, मधुमत्यै नमः, महापुण्यायै नमः।
मुदाकार्यै नमः, मुनिस्तुतायै नमः मोहहन्त्र्यै नमः।
महातीर्थायै नमः, मधुस्रवायै नमः, माधव्यै नमः।
मानिन्यै नमः, मान्यायै नमः, मनोरथपथातिगायै०।
मोक्षदायै नमः, मतिदायै नमः, मुख्यायै नमः।
महाभाग्यजनाश्रितायै नामः, महावेगवत्यै नमः, मेध्यायै नमः।
महायै नमः, महिमभूषणायै नमः, महाप्रभावायै नमः।
महत्यै नमः, मीनचञ्चललोचनायै०, महाकारुण्यसम्पूर्णायै।
महर्द्धये नमः, महोत्पलायै नमः, मूर्तिमते नमः।
मुक्तिरमण्यै नमः, मणिमाणिक्यभूषणायै नमः।
मुक्ताकलापनेपथ्यायै० मनोनयननन्दिन्यै०, महापातकराशिघ्न्यै०।
महादेवार्धहारिण्यै०, महोर्मिमालिन्यै नमः, मुक्तायै नमः
महादेव्यै नमः, मनोन्मायै नमः, महापुण्योदयप्राप्यायै।
मामातिमिरचन्द्रिकायै नमः, महाविद्यायै नमः, महामायायै नमः।
महामेधायै नमः, महौषधायै नमः, मालाधर्यै नमः।
महोपायायै नमः, महोरगविभूषणायै०, महामोहप्रशमिन्यै०।
महामङ्गलमङ्गलायै०, मार्तण्डमण्डलचर्यै०, महालक्ष्म्यै नमः।
मदोज्झितायै नमः, यशस्विन्यै नमः, यशोदायै नमः।
योग्यायै नमः, युक्तात्मसेवितायै० योगसिद्धिप्रदायै०।
याज्यायै नमः, यज्ञेशपरिपूरितायै० यज्ञेश्यै नमः।
यज्ञफलदायै नमः, यजनीयायै नमः, यशस्कर्यै नमः,
यमिसेव्यायै नमः, योगयोनये नमः, योगिन्यै नमः।





युक्तबुद्धिदायै नमः, योगज्ञानप्रदायै नमः, युक्तायै नमः।
यमाद्यष्टाङ्गयोगयुक्ते०, यन्त्रिताघौघसञ्चारायै०, यमलोकनिवारिण्यै०
यातायातप्रशमिन्यै०, यातनानाकृन्तयै०, यामिनीमहिमा-
च्छोदायै नमः, युगधर्मविवर्जितायै०, रेवत्यै नमः, रतिकृते नमः।
रम्यायै नमः, रत्नगर्भायै नमः, रमायै नमः, रतये नमः।
रत्नाकरप्रेमपात्रायै०, रसज्ञायै नमः, रसरूपिण्यै नमः।
रत्नप्रासादगर्भायै नमः, रमणीयतरङ्गिण्यै०, रत्नार्चिषे नमः।
रुद्ररमण्यै नमः, रागद्वेषविनाशिन्यै०, रमायै नमः, रामायै नमः।
रम्यरूपायै नमः, रोगिजीवातुरूपिण्यै०, रुचिकृते नमः।
रोचन्यै नमः, रम्यायै०, रुचिरायै नमः, रोगहारिण्यै नमः।
राजहंसायै नमः, रत्नवत्यै नमः, राजत्कल्लोलराजिकायै०।
रामणीयकरेखायै नम , रुजारये नमः, रोगशोषिण्यै नमः।
राकायै नमः, रङ्कार्तिशमन्यै नमः, रम्यायै नमः।
रोलम्बराविण्यै नमः, रागिण्यै नमः, रञ्जितशिवायै नमः।
रूपलावण्यशेवधये०, लोकप्रसुवे नमः, लोकवन्द्यायै नमः।
लोलत्कल्लोलमालिन्यै नमः, लीलावत्यै नमः, लोकभूमये नमः।
लोकलोचनचन्द्रिकायै नमः, लेखस्रवन्त्यै नमः, लटभायै नमः।
लघुवेगायै नमः, लघुत्वहृते नमः, लास्यत्तरङ्गहस्तायै०।
ललितायै नमः, लयभङ्गिमायै नमः, लोकबन्धवे नमः।
लोकधात्र्यै नमः, लोकोत्तरगुणोर्जितायै०, लोकत्रयहितायै०।
लोकायै नमः, लक्ष्म्यै नमः, लक्षणलक्षितायै नमः, लीलायै नमः।
लक्षितनिर्वाणायै०, लावण्यामृतवर्षिण्यै०, वैश्वानये नमः।
वासवेड्यायै नमः, वन्ध्यत्वपरिहारिण्यै०, वासुदेवाङ्घ्रिरेणुघ्न्यै०।
वज्रिवज्रनिवारिण्यै०, शुभवत्यै नमः,शुभ फलायै नमः।

शान्त्यै नमः, शान्तनुवल्लभायै नमः, शूलिन्यै नमः ।

शैशववयसे नमः, शीतलामृतवाहिन्यै, शोभावत्यै नमः ।

शीलवत्यै नमः, शोषिताशेषकिल्बिषायै नमः ।

शरण्यायै नमः, शिवदायै नमः, शिष्टायै नमः, शरजन्मप्रसवे नमः ।

शिवायै नमः, शक्तये नमः ।

शशाङ्कविमलायै नमः, शमनस्वसृसम्मतायै०, शमायै नमः ।

शमनमार्गघ्न्यै नमः, शितिकण्ठमहाप्रियायै नमः ।

शुचये नमः, शुचिकर्यै नमः, शेषायै नमः, शेषशायिपदोद्भवायै०,

श्रीनिवासश्रुतये नमः, श्रद्धायै नमः, श्रीमत्यै नमः, श्रियै नमः ।

शुभव्रतायै नमः, शुद्धविद्यायै नमः, शुभावर्तायै नमः ।

श्रुतानन्दायै नमः, श्रुतिस्तुतये नमः, शिवेतरघ्न्यै नमः ।

शबर्यै नमः, शाम्बरीरूपधारिण्यै०, श्मशानशोधिन्यै नमः ।

शान्तायै नमः, शाश्वते नमः, शतधृतिस्तुतायै नमः ।

शालिन्यै नमः, शालिशोभाढ्यायै०, शिखिवाहनगर्भभृते० ।

शंसनीयचरित्रायै०, शातिताशेषपातकायै० ।

षड्गुणैश्वर्यसम्पन्नायै०, षडङ्गश्रुतिरूपिण्यै० ।

षण्ढताहारिसलिलायै०, स्त्यायन्नदनदीशतायै०, सरिद्वरायै नमः ।

सुरसायै नमः, सुप्रभायै नमः, सुरदीर्घिकायै नमः ।

स्वःसिन्धवे नमः, सर्वदुःखघ्न्यै नमः, सर्वव्याधिमहौषधायै नमः ।

सेव्यायै नमः, सिद्धायै नमः, सत्यायै नमः, सूक्तये नमः ।

स्कन्दसुवे नमः, सरस्वत्यै नमः, सम्पत्तरङ्गिण्यै नमः ।

स्तुत्यायै नमः, स्थाणुमौलिकृतालयायै नमः, स्थैर्यदायै नमः ।

सुभगायै नमः, सौख्यायै नमः, स्त्रीषु सौभाग्यदायिन्यै नमः ।

स्वर्गनिःश्रेणिकायै नमः, सूक्ष्मायै नमः, स्वधायै नमः ।





स्वाहायै नमः, सुधाजलायै नमः, समुद्ररूपिण्यै नमः ।

स्वर्ग्यायै नमः, सर्वपातकवैरिण्यै०, स्मृताघहारिण्यै नमः ।

सीतायै नमः, संसाराब्धितरण्डिकायै नमः ।

सौभाग्यसुन्दर्यै नमः, सन्ध्यायै नमः, सर्वसारसवतीमान्यै० ।

हरिप्रियायै नमः, हृषीकेश्यै नमः, हंसरूपायै नमः ।

हिरण्मय्यै नमः, हृताघसंघायै नमः, हितकृते नमः ।

हेलायै नमः, हेलाघगर्वहृते नमः, क्षेमदायै नमः ।

क्षालिताघौघायै०, क्षुद्रविद्राविण्यै०, क्षमायै नमः, ब्रह्मद्रवायै नमः ।

इति श्रीकाशीखण्डोक्ता गङ्गासहस्रनामावली समाप्ता ।

■

# श्रीराम-सहस्रनामस्तोत्रम्

राजीवलोचनः श्रीमान् श्रीरामो रघुपुंगवः।
रामभद्रः सदाचारो राजेन्द्रो जानकीपतिः ॥१॥

अग्रगण्यो वरेण्यश्च वरदः परमेश्वरः।
जनार्दनो जितामित्रः परार्थैकप्रयोजनः ॥२॥

विश्वामित्रप्रियो दान्तः शत्रुजिच्छत्रुतापनः।
सर्वज्ञः सर्वदेवादिशरण्यो वालिमर्दनः ॥३॥

ज्ञानभाव्योऽपरिच्छेद्यो वाग्मी सत्यव्रतः शुचिः।
ज्ञानगम्यो दृढप्रज्ञः खरध्वंसी प्रतापवान् ॥४॥

द्युतिमानात्मवान् वीरो जितक्रोधोऽरिमर्दनः।
विश्वरूपो विशालाक्षः प्रभुः परिवृढो दृढ ॥५॥

ईशः खड्गधरः श्रीमान् कौशलेयोऽनसूयकः।
विपुलांसो महोरस्कः परमेष्ठी परायणः ॥६॥

सत्यव्रतः सत्यसन्धो गुरुः परमधार्मिकः।
लोकज्ञो लोकवन्द्यश्च लोकात्मा लोककृत्परः ॥७॥

अनादिर्भगवान् सेव्यो जितमायो रघूद्वहः।
रामो दयाकरो दक्षः सर्वज्ञः सर्वपावनः ॥८॥

ब्रह्मण्यो नीतिमान् गोप्ता सर्वदेवमयो हरिः।
सुन्दरः पीतवासाश्च सूत्रकारः पुरातनः ॥९॥

सौम्यो महर्षिः कोदण्डी सर्वज्ञः सर्वगोचरः।
कविः सुग्रीववरदः सर्वपुण्याधिकप्रदः ॥१०॥

भव्यो जितारिषड्वर्गो महोदारोऽघनाशनः।
सुकीर्तिरादिपुरुषः कांतः पुण्यकृतागमः ॥११॥





अकल्मषश्चतुर्बाहुः सर्वावासो दुरासदः।
स्मितभाषी निवृत्तात्मा स्मृतिमान्वीर्यवान् प्रभुः ॥१२॥

धीरोदात्तो घनश्यामः सर्वायुधविशारदः।
अध्यात्मयोगनिलयः सुमना लक्ष्मणाग्रजः ॥१३॥

सर्वतीर्थमयः शूरः सर्वयज्ञफलप्रदः।
यज्ञस्वरूपी यज्ञेशो जरामरणवर्जितः ॥१४॥

वर्णाश्रमकरो वर्णी शत्रुजित्पुरुषोत्तमः।
विभीषणप्रतिष्ठाता परमात्मा परात्परः ॥१५॥

प्रमाणभूतो दुर्ज्ञेयः पूर्णः परपुरंजयः।
अनन्तदृष्टिरानन्दो धनुर्वेदी धनुर्धरः ॥१६॥

गुणाकरो गुणश्रेष्ठः सच्चिदानन्दविग्रहः।
अभिवन्द्यो महाकायो विश्वकर्मा विशारदः ॥१७॥

विनीतात्मा वीतरागस्तपस्वीशो जनेश्वरः।
कल्याणप्रकृतिः कल्यः सर्वेशः सर्वकामदः ॥१८॥

अक्षरः पुरुषः साक्षात् केशवः पुरुषोत्तमः।
लोकाध्यक्षो महामायो विभीषणवरप्रदः ॥१९॥

आनन्दविग्रहो ज्योतिर्हनूमत्प्रभुरक्षयः।
भ्राजिष्णुः सहनो भोक्ता सत्यवादी बहुश्रुतः ॥२०॥

सुखदः कारणं कर्ता भवबन्धविमोचनः।
देवचूडामणिर्नेता ब्रह्मण्यो ब्रह्मवर्धनः ॥२१॥

संसारोत्तारको रामः सर्वदुःखविमोक्षकृत्।
विद्वत्तमो विश्वभर्ता विश्वहर्ता च विश्वकृत् ॥२२॥

नित्यो नियतकल्याणः सीताशोकविनाशकृत्।
काकुत्स्थः पुण्डरीकाक्षो विश्वामित्रभयापहः ॥२३॥

मारीचमथनो रामो विराधवधपण्डितः ।
दुस्वप्ननाशनो दम्यः किरीटी त्रिदशाधिपः ॥२४॥

महाधनुर्महाकायो भीमो भीमपराक्रमः ।
तत्त्वस्वरूपी तत्त्वज्ञस्तत्त्ववादी सुविक्रमः ॥२५॥

भूतात्मा भूतकृत्स्वामी कालज्ञानी महावटुः ।
अनिर्विण्णो गुणग्राही निष्कलंकः कलङ्कहा ॥२६॥

स्वभावभद्रः शत्रुघ्नः केशवः स्थाणुरीश्वरः ।
भूतादिः शम्भुरादित्यः स्थविष्ठः शाश्वतो ध्रुवः ॥२७॥

कवची कुण्डली चक्री खड्गी भक्तजनप्रियः ।
अमृत्युर्जन्मरहितः सर्वजित्सर्वतापसः ॥२८॥

अनुत्तमोऽप्रमेयात्मा सर्वादिर्गुणसागरः ।
समः समात्मा समगो जटामुकुटमण्डितः ॥२९॥

अजयः सर्वभूतात्मा विष्वक्सेनो महातपाः ।
लोकाध्यक्षो महाबाहुरमृतो देववित्तमः ॥३०॥

सहिष्णुः सद्गतिः शास्ता विश्वयोनिर्महाद्युतिः ।
अतीन्द्र ऊर्जितः प्रांशुरुपेन्द्रो वामनो बली ॥३१॥

धनुर्वेदविधाता च ब्रह्मा विष्णुश्च शंकरः ।
हंसो मरीचिर्गोविन्दो रत्नगर्भो महामतिः ॥३२॥

व्यासो वाचस्पतिः सर्वदर्पितासुरमर्दनः ।
जानकीवल्लभः पूज्यः प्रकटः प्रीतिवर्धनः ॥३३॥

संभवोऽतीन्द्रियो वेद्योऽनिर्देशो जांबवत्प्रभुः ।
दमनो मथनो व्यापी विश्वरूपी निरञ्जनः ॥३४॥

नारायणोऽग्रणीः साधुर्जटायुः प्रीतिवर्धनः ।
नैकरूपो जगन्नाथः सुरकार्यहितः स्वभूः ॥३५॥





जितक्रोधो जितारातिः प्लवगाधिपराज्यदः ।
वसुदः सुभुजो नैकमायो भव्यप्रमोदनः ॥३६॥

चण्डांशुः सिद्धसंकल्पः शरणागतवत्सलः ।
अगदो रोगहर्ता च मन्त्रविन्मन्त्रभावनः ॥३७॥

सौमित्रिवत्सलो धुर्यो व्यक्ताव्यक्तस्वरूपधृक् ।
विशिष्टो ग्रामणीः श्रीमान् अनुकूलप्रियंवदः ॥३८॥

अतुलः सात्त्विको धीरः शरासनविशारदः ।
ज्येष्ठः सर्वगुणोपेतः शक्तिमांस्ताटकान्तकः ॥३९॥

वैकुण्ठः प्राणिनां प्राणः कमठः कमलापतिः ।
गोवर्धनधरो मत्स्यरूपः कारुण्यसागरः ॥४०॥

कुम्भकर्णप्रभेत्ता च गोपीगोपालसंवृतः ।
मायावी स्वापनो व्यापी रैणुकेयबलापहः ॥४१॥

पिनाकमथनो वन्द्यः सम्मतो गरुडध्वजः ।
लोकत्रयाश्रयो लोकचरितो भरताग्रजः ॥४२॥

श्रीधरः सद्गतिर्लोकसाक्षी नारायणो बुधः ।
मनोवेगी मनोरूपी पूर्णः पुरुषपुङ्गवः ॥४३॥

यदुश्रेष्ठो यदुपतिर्भूतावासः सुविक्रमः ।
तेजोधरो धरोऽव्यग्रश्चतुर्मूर्तिर्महानिधिः ॥४४॥

चाणूरमर्दनो दिव्यः शान्तो भरतवंदितः ।
शब्दातिगो गभीरात्मा कोमलाङ्गः प्रजागरः ॥४५॥

लोकगर्भः शेषशायी क्षीराब्धिनिलयोऽमलः ।
आत्मयोनिरदीनात्मा सहस्राक्षः सहस्रपात् ॥४६॥

अमृतांशुर्महागर्भो निवृत्तविषयस्पृहः ।
त्रिकालज्ञो मुनिः साक्षी वैहायसगतिः कृती ॥४७॥

पर्जन्यः कुमुदो भूतावासः कमललोचनः ।
श्रीवत्सवक्षाः श्रीरामो वीरहा लक्ष्मणाग्रजः ॥४८॥

लोकाभिरामो लोकारिमर्दनः सेवकप्रियः ।
सनातनतमो मेघश्यामलो राक्षसान्तकृत् ॥४९॥

दिव्यायुधधरः श्रीमानप्रमेयो जितेन्द्रियः ।
भूदेववन्द्यो जनकप्रियकृत्प्रपितामहः ॥५०॥

उत्तमः सात्त्विकः सत्यः सत्यसंधस्त्रिविक्रमः ।
सुव्रतः सुलभः सूक्ष्मः सुघोषः सुखदः सुधीः ॥५१॥

दामोदरोऽच्युतः शार्ङ्गी वामनो मधुराधिपः ।
देवकीनन्दनः शौरिः शूरः कैटभमर्दनः ॥५२॥

सप्ततालप्रभेत्ता च मित्रवंश प्रवर्धनः ।
कालस्वरूपी कालात्मा कालः कल्याणदः कविः ॥५३॥

संवत्सरो ऋतुः पक्षः अयनो दिवसो युगः ।
स्तव्यो विविक्तो निर्लेपः सर्वव्यापी निराकुलः ॥५४॥

रसो रसज्ञः सारज्ञो लोकसारो रसात्मकः ।
सर्वदुःखातिगो विद्याराशिः परमगोचरः ॥५५॥

शेषो विशेषो विगतकल्मषी रघुनायकः ।
वर्णश्रेष्ठो वर्णवाह्यो वर्ण्यो वर्ण्यगुणोज्ज्वलः ॥५६॥

कर्मसाक्ष्यमरश्रेष्ठो देवासुरनमस्कृतः ।
देवादिदेवो देवर्षिर्देवासुरवरप्रदः ॥५७॥

सर्वदेवमयश्चक्री शार्ङ्गपाणिरनुत्तमः ।
मनोबुद्धिरहंकारः प्रकृतिः पुरुषोऽव्ययः ॥५८॥

अहल्यापावनः स्वामी पितृभक्तो वरप्रदः ।
न्यायो नयधरः श्रीमान्नयो नगधरो ध्रुवः ॥५९॥





लक्ष्मीविश्वम्भराभर्ता देवेन्द्रो बालीमर्दनः ।
बाणारिमर्दनो यज्वाऽनुत्तमो मुनिसेवितः ॥६०॥

देवाग्रणीः परध्यानतत्परः परमः परः ।
सामगानप्रियोऽक्रूरः पुण्यकीर्तिः सुलोचनः ॥६१॥

पुण्यः पुण्याधिकः पूर्वः पूर्णः पूरयिता रविः ।
जटिलः कल्मषध्वान्तः प्रभञ्जनविभावसुः ॥६२॥

अव्यक्तलक्षणोऽव्यक्तो दशास्यद्विपकेसरी ।
कलानिधिः कलारूपो कमलानन्दवर्धनः ॥६३॥

जयो जरारिः सर्वाघशमनो भवभञ्जनः ।
अलङ्करिष्णुरचलो रोचिष्णुर्विक्रमोत्तमः ॥६४॥

अंशुः शब्दपतिः शब्दगोचरो रञ्जनो रघुः ।
निश्शब्दः प्रणवो माली स्थूलः सूक्ष्मो विचक्षणः ॥६५॥

आत्मयोनिरयोनिश्च सप्तजिह्वः सहस्रपात् ।
सनातनतमः स्रग्वी पेशलो जविनांवरः ॥६६॥

शक्तिमान् शङ्खभृन्नाथः गदापद्मरथाङ्गभृत् ।
निरीहो निर्विकल्पश्च चिद्रूपो जितसाध्वसः ॥६७॥

शताननः सहस्राक्षः शतमूर्तिघनप्रभः ।
हृत्पुण्डरीकशयनो कठिनो द्रव एव च ॥६८॥

उग्रो ग्रहपतिः कृष्णः समर्थोऽनर्थनाशनः ।
अधर्मशत्रुरक्षोघ्नः पुरुहूतः पुरुष्टुतः ॥६९॥

ब्रह्मगर्भो बृहद्गर्भो धर्मधेनुर्धनागमः ।
हिरण्यगर्भो ज्योतिष्मान् सुललाटः सुविक्रमः ॥७०॥

पितृपूजारतश्चैव भवानीप्रियकृद्वशी ।
नरो नारायणो रामः कपर्दी नीललोहितः ॥७१॥

उग्रः पशुपतिः स्थाणुर्विश्वामित्रो द्विजेश्वरः ।
मातामहो मातरिश्वा विरिंचो विष्टरश्रवाः ॥७२॥

अक्षोभ्यः सर्वभूतानां चण्डः सर्वपराक्रमः ।
वालखिल्यो महाकल्पः कल्पवृक्षः कलाधरः ॥७३॥

निदाघस्तपनोऽमोघः श्लक्ष्णः परबलापहृत् ।
कबन्धमथनो दिव्यः कम्बुग्रीवः शिवप्रियः ॥७४॥

शंखोऽनिलः सुनिष्पन्नः सुरभिः शिशिरात्मकः ।
असंस्पृष्टोऽतिथिः शूरः परधिः पापनाशकृत् ॥७५॥

वसुश्रवाः कव्यवाहो प्रतपा विश्वभोजनः ।
रामो नीलोत्पलश्यामो ज्ञानस्कन्धो महाद्युतिः ॥७६॥

पवित्रपादः पारपो मणिपूरो नभोगतिः ।
उत्तारणो दुष्कृतिहा दुर्धर्षो दुस्सहोऽभयः ॥७७॥

अमृतांशोऽमृतवपुर्धर्मस्चापि कृपाकरः ।
भर्गो विवस्वानादित्यो योगाचार्यो दिवस्पतिः ॥७८॥

उदारकीर्तिरुद्योगी वाङ्मयः सदसन्मयः ।
नक्षत्रमाली नाकेशः स्वाधिष्ठानः षडाश्रयः ॥७९॥

चतुर्वर्गफलो वर्णी शक्तित्रयफलं निधिः ।
निधानगर्भो निर्व्याजो गिरीशो व्याजमर्दनः ॥८०॥

श्रीवल्लभः शिवारम्भः शान्तिर्भद्रः समञ्जसः ।
भूयशो भूतिकृद्भूतिः भूषणो भूतवाहनः ॥८१॥

अकायो भक्तकायस्थो कालज्ञानी महावटुः ।
परार्थवृत्तिरचलो विविक्तः श्रुतिसागरः ॥८२॥

स्वभावभद्रो मध्यस्थः संसारभयनाशनः ।
वेद्यो वंद्यो वियद्गोप्ता सर्वामरमुनीश्वरः ॥८३॥





सुरेन्द्रः करणं कर्म कर्मकृत्कर्म्यधोक्षजः ।
धैर्योऽग्रधुर्यो धात्रीशः संकल्पः शर्वरीपतिः ॥८४॥

परमार्थगुरुर्वृद्धः शुचिराश्रितवत्सलः ।
विष्णुर्जिष्णुर्विभुर्वन्द्यो यज्ञेशो यज्ञपालकः ॥८५॥

प्रभविष्णुर्ग्रसिष्णुश्च लोकात्मा लोकभावनः ।
केशवः केशिहा काव्यः कविः कारणकारणम् ॥८६॥

काव्यकर्ता कलाशेषो वासुदेवः पुरुष्टुतः ।
आदिकर्ता वराहश्च माधवो मधुसूदनः ॥८७॥

नारायणो नरो हंसो विष्वक्सेनो जनार्दनः ।
विश्वकर्ता महायज्ञो ज्योतिष्मान् पुरुषोत्तमः ॥८८॥

वैकुण्ठः पुण्डरीकाक्षः कृष्णः सूर्यसुरार्चितः ।
नारसिंहो महाभीमो वक्रदंष्ट्रो नखायुधः ॥८९॥

आदिदेवो जगत्कर्ता योगीशो गरुड़ध्वजः ।
गोविन्दो गोपतिर्गोप्ता भूपतिर्भुवनेश्वरः ॥९०॥

पद्मनाभो हृषीकेशो धाता दामोदरः प्रभुः ।
त्रिविक्रमस्त्रिलोकेशो ब्रह्मेशः प्रीतिवर्धनः ॥९१॥

वामनो दुष्टदमनो गोविन्दो गोपवल्लभः ।
भक्तप्रियोऽच्युतः सत्यः सत्यकीर्तिर्धृतिः स्मृतिः ॥९२॥

कारुण्यं करुणो व्यासः पापहा शान्तिवर्धनः ।
संन्यासी शास्त्रतत्त्वज्ञो मन्दराद्रिनिकेतनः ॥९३॥

बदरीनिलयः शान्तस्तपस्वी वैद्युतप्रभः ।
भूतावासो गुहावासः श्रीनिवासः श्रियः पतिः ॥९४॥

तपोवासो मुद्रावासः सत्यावासः सनातनः ।
पुरुषः पुष्करः पुण्यः पुष्कराक्षो महेश्वरः ॥९५॥

पूर्णमूर्तिः पुराणज्ञः पुण्यदः पुण्यवर्धनः ।
शङ्खी चक्री गदी शार्ङ्गी लाङ्गली मुसली हली ॥९६॥
किरीटकुण्डली हारी मेखली कवची ध्वजी ।
योद्धा जेता महावीर्यः शत्रुजिच्छत्रुतापनः ॥९७॥
शास्ता शास्त्रकरः शास्त्रं सततं शंकरस्तुतः ।
सारथिः सात्त्विकः स्वामी, सामवेदप्रियः समः ॥९८॥
हवनः साहसः शक्तिः संपूर्णाङ्गः समृद्धिमान् ।
स्वर्गदः कामदः श्रीदः कीर्तिदोऽकीर्तिनाशनः ॥९९॥
मोक्षदः पुण्डरीकाक्षः क्षीराब्धिकृतकेतनः ।
सर्वात्मा सर्वलोकेशः प्रेरकः पापनाशनः ॥१००॥
सर्वदेवो जगन्नाथः सर्वलोकमहेश्वरः ।
सर्गस्थित्यन्तकृद्देवः सर्वलोकसुखावहः ॥१०१॥
अक्षय्यः शाश्वतोऽनन्तः क्षयवृद्धिविवर्जितः ।
निर्लेपो निर्गुणः सूक्ष्मो निर्विकारो निरञ्जनः ॥१०२॥
सर्वोपाधिविनिर्मुक्तः सत्तामात्रव्यवस्थितः ।
अधिकारी विभुर्नित्यः परमात्मा सनातनः ॥१०३॥
अचलो निर्मलो व्यापी नित्यतृप्तो निराश्रयः ।
श्यामो युवा लोहिताक्षो दीप्तास्यो मितभाषणः ॥१०४॥
आजानुबाहुः सुमुखः सिंहस्कन्धो महाभुजः ।
सत्यवान् गुणसम्पन्नः स्वयंतेजा सुदीप्तिमान् ॥१०५॥
कालात्मा भगवान् कालः कालचक्रप्रवर्तकः ।
नारायणः परंज्योतिः परमात्मा सनातनः ॥१०६॥
विश्वसृड् विश्वगोप्ता च विश्वगोप्ता च शाश्वतः ।
विश्वेश्वरो विश्वमूर्तिर्विश्वात्मा विश्वभावनः ॥१०७॥
सर्वभूतसुहृच्छान्तः सर्वभूतानुकम्पनः ।
सर्वेश्वरेश्वरः सर्वः श्रीमानाश्रितवत्सलः ॥१०८॥





सर्वगः सर्वभूतेशः सर्वभूताशयस्थितः ।
आभ्यन्तरस्य तमसश्छेत्ता नारायणः परः ॥१०९॥
अनादिनिधनः स्रष्टा प्रजापतिपतिर्हरिः ।
नारसिंहो हृषीकेशः सर्वात्मा सर्वदृग्वशी ॥११०॥
जगतस्तस्थुषश्चैव प्रभुर्नेता सनातनः ।
कर्ता धाता विधाता च सर्वेषां प्रभुरीश्वरः ॥१११॥
सहस्रमूर्तिर्विश्वात्मा विष्णुर्विश्वदृगव्ययः ।
पुराणपुरुषः स्रष्टा सहस्राक्षः सहस्रपात् ॥११२॥
तत्त्वं नारायणो विष्णुः वासुदेवः सनातनः ।
परमात्मा परब्रह्म सच्चिदानन्दविग्रहः ॥११३॥
परंज्योति परंधाम पराकाशः परात्परः ।
अच्युतः पुरुषः कृष्णः शाश्वतः शिव ईश्वरः ॥११४॥
नित्यः सर्वगतः स्थाणुरुग्रः साक्षी प्रजापतिः ।
हिरण्यगर्भः सविता लोककृल्लोकभृद्विभुः ॥११५॥
रामः श्रीमान् महाविष्णुः जिष्णुर्देवहितावहः ।
तत्त्वात्मा तारकब्रह्म शाश्वतः सर्वसिद्धिदः ॥११६॥
अकारवाच्यो भगवान् श्रीपतिर्भूपतिः पुमान् ।
सर्वलोकेश्वरः श्रीमान् सर्वज्ञः सर्वतोमुखः ॥११७॥
स्वामी सुशीलः सुलभः सर्वज्ञः सर्वशक्तिमान् ।
नित्यसम्पूर्णकामश्च नैसर्गिकसुहृत्सुखी ॥११८॥
कृपापीयूषजलधिः शरण्यः सर्वदेहिनाम् ।
नारायणश्च स्वामी च जगतां पतिरीश्वरः ॥११९॥
श्रीशः शरण्यो भूतानां संश्रिताभीष्टदायकः ।
अनन्तः श्रीपति रामो गुणभृन्निर्गुणो महान् ॥१२०

इति श्रीराम-सहस्रनामस्तोत्रं सम्पूर्णम् ।